श्रीः

ऋग्वेद-कवि-विमर्शः

विद्यया विन्दतेऽमृतम्

श्री लाल बहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठम्

डॉ० मधुकर गो० माईणकरः

श्रीः

संस्कृत विद्यापीठमालायाः अष्टमं पुष्पम्

ऋग्वेद-कवि-विमर्शः

(शारद-महोत्सवे कृतं व्याख्यानत्रयम्)

प्रस्तावना-लेखक :

श्री भक्तदर्शनः

केन्द्रीय राज्य शिक्षा मन्त्री

व्याख्याता :

माईणकरोपाह्वः गोविन्दात्मजः त्र्यंबकः

एम०ए०, पी०एचडी०, डी० लिट्० इत्युपाध्यलंकृतः
मुंबई विश्वविद्यालये डॉ० भण्डारकर-अध्यासन-नियुक्तः
संस्कृत-प्राध्यापकः विभागाध्यक्षश्च, भूतपूर्वः कलासंकायाध्यक्षः
पुण्यपत्तन-विश्वविद्यालये, प्राचार्यश्च भर्गसन्महाविद्यालये,
संस्कृत-विभागाध्यक्षः प्राध्यापकश्च दिल्ली-विश्वविद्यालये ।

प्रधान सम्पादकः

डॉ० मण्डन मिश्रः
प्राचार्य :

श्री लालबहादुरशास्त्री केन्द्रीय संस्कृत-
विद्यापीठस्य

प्रकाशक:

डॉ० मण्डन मिश्रः
प्राचार्यः

श्री लालबहादुर शास्त्री केन्द्रीय संस्कृत
विद्यापीठम्, दिल्ली ।

प्रथम संस्करणम् ११०० प्रतयः

मूल्यम्— ३-०० (रूप्यकत्रयम्)

मुद्रक :

आनन्द प्रिंटिङ्ग प्रैस, २/३४ रूपनगर, दिल्ली-७

प्रस्तावना

वेद हमारे अध्ययन और चिन्तन के ही नहीं, हमारे जीवन के भी आधार हैं। चिरकाल तक भारतीय मनीषियों ने उन पर चिन्तन कर विशाल वाङ्मय का विस्तार किया है। संस्कृत का अगाध और अपार साहित्य वेदों की व्याख्या है। हमारे दर्शनों, पुराण-इतिहासों और कथा-काव्यों में वैदिक संदेश विभिन्न रूपों में प्रतिध्वनित हो रहे हैं। तेरहवीं शताब्दी तक भारतीय मनीषियों द्वारा किये गये वैदिक चिन्तनों की धारा तीव्र या मन्द वेग से निरन्तर बहती हुई दीखती रही। उसके बाद अर्थात् सायण, माधव, महीधर आदि आचार्यों के अनंतर वह धारा कहीं-कहीं खण्डित-सी होती प्रतीत होती है।

किन्तु सत्रहवीं शताब्दी से यह धारा पुनः प्रवाहित हो उठी। इस बार भारतीय मनीषियों की अपेक्षा पाश्चात्य विद्वानों ने वैदिक साहित्य का अध्ययन और चिन्तन बड़ी लगन से किया। परम्परागत विचारधारा को छोड़कर इन विद्वानों ने अपने-अपने ढंग से भी वेदों की व्याख्याएं कीं।

संस्कृत साहित्य के यशस्वी विद्वान् बम्बई विश्वविद्यालय के संस्कृत विभाग के अध्यक्ष डॉ० माइणकर ने श्रीलालबहादुरशास्त्री केन्द्रीयसंस्कृतविद्यापीठ, दिल्ली के शारदीयज्ञानमहोत्सव के सुअवसर पर अपनी व्याख्यानमाला द्वारा भारतीय और पाश्चात्य दोनों मनीषियों के मननों को दिखाते हुए वेदों के काव्यरूप का या वैदिक ऋषियों के कविरूप का मौलिक और प्रामाणिक रूप में प्रतिपादन कर शारदीयज्ञानमहोत्सव की व्याख्यानमालाओं की विद्वत्ता और साधना से सम्पन्न शृंखला में एक सुन्दर योगदान किया है।

'धीरासः पदं कवयो नयन्ति नानाहृदा रक्षमाणा अजुर्यम्'

(१,१४६,४)

इत्यत्र धीरैः कविभिः हृदा रक्ष्यमाणस्याविकार्यस्य (अपरिवर्त्तनीयस्य) नानाविधस्य पदस्य नयनं काव्यद्वारा सहृदयेषु प्रापणमुपवर्ण्यते। यथा "द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः।" इत्यत्र कपालिपदस्यापरिवर्त्तनीयत्वम्, एतदेव तस्य वेदोक्तम् अजुर्यत्वम्। पुनश्च—

"नव्यं नव्यं तन्तुमातन्वते दिवि समुद्रे अन्तः कवयः सदीतयः" (ऋ० १,१५६,४)

इत्यत्र प्रकाशमय आकाशे शोभनप्रतिभानां कवीनां नव्यनव्यानां छन्दसामातानं प्रतिपाद्यते। अन्यच्च—

"अनु पश्चात्कवयो यन्ति रेभाः, (ऋ० १.१६३.१२)

इत्यत्र स्तुतिकराणां कवीनां स्तोतव्यानुसरणं प्रस्तूयते।

'सप्त तन्तून् विततिनिरे कवय ओतवाउ' (ऋ० १.१६४.५)

इत्यत्र कविभिः काव्यरूपपटवयनाय सप्तानां छन्दसां तन्तुवद् वितानमुपस्तूयते। तथैव—

'अचिकित्वांश्चिकितुषश्चिदत्र कवीन् पृच्छामि विद्मनेन विद्वान्, (ऋ० १.१६४.६)

इत्यत्र अजानानस्य अविदुषो वा ज्ञानसम्पन्नेभ्यः कविभ्यः, प्रश्नद्वारा 'काव्यज्ञशिक्षयाभ्यास' इत्याद्युक्तो ज्ञानलाभोऽप्युपक्रम्यते। एवमादिभिः परःशतैर्मन्त्रैः कविस्वरूपस्वभावमाहात्म्यादिवर्णनं वैदिकानामृषीणां कवित्वं प्रति प्रीत्यतिशयं समादरभरञ्चाभिव्यनक्ति, नैतावदेव, अपि तु सर्वान् कवीन् अतिशयानस्य प्रथमवैदिकर्षेर्वेधसः कवितमत्वमप्याम्नायते—

'आहोता मन्द्रो विदथान्यस्थात् सत्यो यज्वा कवितमः सवेधाः' (ऋ० ३.१४.१)

इत्यत्र। एवमेव आद्येषु त्रिपु वैदिकर्षिषु वाय्वग्निसूर्येषु सूर्यापरनाम्नः सवितुरपि कवितमत्वमनुश्रूयते–

'उदीरय कवितमं कवीनाम्' (ऋ० ५.४२.३)

इत्यत्र। कवीनां कवितमस्य प्रसादनं तर्पणञ्च महते फलाय कल्पमानमपि प्रस्तूयते। अन्यच्च कवितमस्य महत्याः प्रज्ञायाः प्रतिभापरपर्यायाया अन्यैरधर्षणीयत्वमपि श्रूयते—

'इमामूनु कवितमस्य मायां महीं देवस्य न किरादधर्ष' (ऋ० ५.८५.६)

न च केवलयोः कविकवितमयोरेवात्र चर्चा, अपितु कवितरोऽपि कश्चिदुपस्तूयते–

'अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति'। (ऋ० ७.८६ ७)

इत्यत्र कवितरस्य प्रेरणं धनलाभाय जायमानं 'काव्यं यशसेऽर्थकृते' इत्याद्युक्तं काव्यस्यार्थकृत्त्वमपि पुष्णाति।

कविपदमिव काव्यपदस्यापि भूयान् प्रयोगो वेदेष्वस्तीति पूर्वं प्रतिज्ञातम्, दिङ्मात्रं तूदाह्रियते—

'अस्मा इत्काव्यं वच उक्थमिन्द्राय शंस्यम्' (५.३९.५)

इत्यत्र काव्यप्रकारकं वचनमिन्द्राय शंसनीयतयाऽऽम्नायते। काव्यपदं कविकर्मणीव कविपुत्रेऽपि प्रयुज्यमानं वेदेष्ववलोक्यते—

"त्वं वृध इन्द्र पूर्व्यो भूर्वरिवस्यन्नुशने काव्याय (ऋ० ६.२०.११)

इत्यादिवत्' कविकर्मणा ऋषेर्विप्रवत्पूज्यत्वमप्यादिश्यते—

अयं कृत्नुरगृभीतो विश्वजिदुद्भिदित्सोमः। ऋषिर्विप्रः काव्येन (ऋ० ७६.१)

इत्थं कविकाव्यपदयोर्लोकोत्तरवर्णनानिपुणकवितत्कर्मणोरर्थयोः प्रचुरे प्रयोगे विद्यमानेऽपि ऋषीणां कवित्वे तत्कृतानां मन्त्राणाञ्च काव्यत्वे को नाम विसंवादमुपस्थापयेत् प्राज्ञः। प्राज्ञतमेन च डॉ० माइनकरेण स्थापितं तद्द्वयं नानुमोदयेत्।

विषयस्य मौलिकत्वमिव तत्प्रतिपादनशैल्या अपि किञ्चिदलौकिकत्वं डॉ० माइनकरकृतेषु व्याख्यानेषु विराजते। तथाहि 'वैदिककविमनसः पृष्ठभूमिः, वैदिककवीनां काव्यविषयविचारः'। वैदिककवीनां परत्तत्व साक्षात्कारं' इत्येष व्याख्यानशीर्षकक्रमो न बलाद् अपि तु हठान्माननीयस्यास्य महानुभावस्य मते मननीयतां माननीयतां च प्रस्तौति। व्याख्यानमालया चानया विनतेनमूर्ध्ना, सरसेन च हृदा धारणीयया को नाम नाभिष्टौति ग्रन्थयितारमस्याः। यस्य प्राच्येषु प्रतीच्येषु चोभयेषु विद्योद्यानेषु सत्पुष्पावचयने, तद्गुम्फने च कौशलं विशदं विभ्राजते।

अत्राहमेतादृशस्य महतोऽवदानस्य धन्यवादशतेनापि प्रत्युपक्रियामपश्यन् विद्यापीठमात्मानञ्चाधमर्णतयैव स्थापयन्नपि प्रसादविशेषमन्तरासादयामि।

विशेषतः केन्द्रीयराज्यशिक्षामन्त्रिभिः अस्माकं राष्ट्रियसंस्कृतसंस्थानस्य शासिपरिषदध्यक्षैः श्रद्धेयैः श्रीभक्तदर्शनमहोदयैरस्य प्रस्तावनां विलिख्य यदिदं प्रोत्साहनं विद्यापीठाय प्रदत्तं तत्कृते तान् प्रति कृतज्ञतां प्रकाशयन् अस्य प्रकाशनेऽनवधानतया सञ्जातानां त्रुटीनाञ्च कृते क्षमाप्रार्थनां विदधत् अस्य प्रूफसंशोधनादिकार्ये साहाय्यमाचरितवद्भ्यो दिल्लीविश्वविद्यालये संस्कृतप्रवाचकेभ्यो मित्रवरेभ्यो डॉ० व्रजमोहनचतुर्वेदिभ्यो धन्यवादांश्च वितरन्निमं विमर्शं सविनयं पाठकेभ्यः समर्पयामि।

शिवरात्रिः १९७१ ई०

विदुषामाश्रवः

मण्डनमिश्रः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विद्यापीठम्

शारद-ज्ञानमहोत्सवे

प्रथमं व्याख्यानम्

२१-३-१९६९

वैदिककविमनसः पृष्ठभूमिः

अनन्याधीनकल्याणान् भक्तकल्याणवर्धकान् ।
योगीन्द्रान् सद्गुरून् वन्दे श्रीनृसिंहसरस्वतीन् ॥

अध्यक्षमहोदयाः, निदेशकमहोदयाः, मान्याश्च,

सत्यं ब्रवीमि, न जानामि आत्मनः कृतज्ञतां याथार्थ्येन प्रकटीकर्तुम् अस्मिन् अवसरे। नास्ति मे तादृशो वाग्विभवः। श्रीलालबहादुर-शास्त्रि-संस्कृत-विद्यापीठस्य, शारदीय-ज्ञान-महोत्सवो नाम महत् ज्ञानसत्रम्। एतस्मिन्नवसरे, वक्तृस्वरूपेणाहं नियुक्तो निदेशक-महोदयैः श्रीमन्मण्डनमिश्रैः न जाने कं विचारमवलम्ब्य, किं वा मनसि विचिन्त्य। मत्पूर्वमासंश्चास्मिन् सत्रे वक्तारः सुगृहीतनामधेयाः विदुषां वरेण्याः महामहोपाध्यायाः गिरिधरशर्मचतुर्वेदिमहोदयाः, तथैव च गौरीनाथशास्त्रिणः एवंविधाश्चान्ये प्रकाण्डपण्डिताः यथार्थत्वेन विद्यावाचस्पतयः। तान् महोदयान् अनुयास्यतः संजायते संकोचो मे मनसि। न च मे विद्यते सा तपस्या या एतेषां सर्वेषां महाभागानां सर्वविद्वज्जन सुविदिता। न वा मे तादृशो विशिष्टोऽधिकारो यो नूनमासीत् तेषां महोदयानाम्। मन्ये सर्वथेयं मेऽनधिकारचेष्टा। तथापि अस्मिन् विषये यदि केनचिदपराद्धं स्यात् तन्निदेशकमहोदयैरेव, यैः मन्ये वक्तृनिमन्त्रणविषये न विशेषेणावधानं दत्तम्। कृतेनानेन गौरवेण कृतज्ञोऽस्मि, जानामि च सर्वेषां सौहार्दं मयि विद्यमानम्। अवश इदानीमहं प्रस्तुतमनुसरामि।

जानन्ति एवात्रभवन्तः सर्वे समुपस्थिताः ऋग्वेदमधिकृत्य किंचित् वक्तुकामोऽस्मि। आयोजिते व्याख्यानत्रये या व्यवस्था मया कल्पिता सा हीदृशी। प्रथमेऽस्मिन् व्याख्याने मया ऋग्वेदस्य या पृष्ठभूमि

तस्याः विवेचनं क्रियते । द्वितीये व्याख्याने ऋग्वेदकवीनां या काव्यविषयका मतिः आसीत्, ये च तेषां काव्यविषयकाः सिद्धान्ताः आसन्, तानधिकृत्य विवेचनं करिष्यते । तृतीये चान्तिमे व्याख्याने ऋग्वेदकवीनां तत्त्वज्ञानात्मकाः ये विचाराः ऋग्वेदे एवोपलभ्यन्ते तेषां विमर्शो भविष्यति । अत्र ये विचाराः भवतां पुरतः मया निधास्यन्ते ते अस्मिन् विषये कृतस्य मम चिन्तनस्य फलरूपाः भवन्ति । अतः यद्यत्र ग्राह्यं किंचिदुपलभ्यते तत् स्वीकर्तव्यम् । यच्च न रुचये भवति, तदवश्यमुपेक्षणीयम् । अत्र यद्वै चिन्तनार्हं तस्य विमर्शः अवश्यं कर्तव्यः । ज्ञानसत्रस्य त्वीदृशमेव स्वरूपमिष्यते सर्वत्र विद्वद्भिः । तदनुरोधेनैव एषा ममाभ्यर्थना ।

प्रथमं तु तावदत्रैव संजायेत आक्षेपः केषामपि, शंका वा समुत्पन्ना भवेत् केषांचिन्मनसि यत् प्रायेण वैदिककवीनां संदर्भे ऋषिशब्दस्य प्रयोगः सर्वेषामभिमतः प्राचीनपरम्पराप्राप्तः सर्वत्र रूढः सर्वेषां च मनसि सुश्लिष्टः । तत् किमर्थं मया अत्र कविरिति शब्दः प्रयुज्यते । अस्याः शंकायाः समाधानमित्थं मया क्रियते । सत्यम्, ऋषिशब्दस्यैव प्रयोगः सुश्लिष्टोऽस्मिन् विषये सन्दर्भे च । तथापि प्रयोजनमनुलक्ष्य तदनुरोधेनैव इह कविशब्दप्रयोगः क्रियते । भवति च निर्वचनम्, ऋषिर्दर्शनादिति । तस्मादेव वैदिकं काव्यं दृष्टं भवति, अपौरुषेयं च कथ्यते । न च तत्र कविप्रयत्नः कोऽपि विद्यते । यथा हि भारविमाघादीनां लौकिककवीनां काव्ये परिश्रमो दृश्यते, रचनाबन्धनिर्मितिर्वा दृश्यते न च तादृशी स्थितिरत्र ऋग्वेदे । ऋग्वेदकवयः ह्याद्या ऋषयः, तेषां वाचमर्थोनुधावति । अपौरुषेये काव्ये कुत्र वा पुरुषप्रयत्नसंभवः भवेत् केषांचित् ईदृशी मतिः । यथा त्वहं पश्यामि, एते वसिष्ठवामदेवादयः कवय एव आसन् यथा कालिदासभवभूत्यादयः । न च भवति तेषां कोऽपि भेदः कस्मिन्नपि विषये । अतः पौरुषेयमेव काव्यमृग्वेदे ।

ऋग्वेद एवोपलभ्यन्ते अस्य मतस्य समर्थनाय प्रबलतमानि प्रमाणानि लिङ्गानि च। यत्तूच्यते, वैदिकं काव्यमपौरुषेयं तत् श्रद्धायाः स्फुरणम्। न तर्कसंगतं श्रौतेन वा लिङ्गेन तत् सिद्धम्। अतएव ऋग्वेदे उपलभ्यमानं काव्यं सर्वं कविनिर्मितमेवेति कल्पनां मनसि सुदृढतरं निधाय ममात्र विवेचनं भवति।

यद्यपि मन्त्रशब्दोऽपि वैदिककाव्यनिर्देशसमये प्रयुक्तो भवति तथापि यथाहं पश्यामि सामर्थ्यवाचक एव सः, न तु अपौरुषेयत्वसमर्थकः। भगवता यास्केनापि निरुक्ते, 'भवन्ति च मन्त्राः प्रार्थनास्वरूपाः' इति मतं प्रदर्शितम्। समीचीनमेव हि तदिति मन्ये। अत्र मयोक्तम्, उपलभ्यन्ते वेदे एव लिङ्गानि यदिदं काव्यं लौकिककाव्यप्रक्रियया एव कविभिर्निर्मितमिति मत्प्रतिपादनसमर्थकानि। तानि-उदाहरामि लिङ्गानि।

प्रथमं तावदिदं काव्यं, ब्रह्म, कविना निर्मितमिति स्पष्टमेव कविभिः कथ्यते। कथयति हि गौरवीतिशाक्त्यः

इन्द्र ब्रह्म क्रियमाणा जुषस्व या ते शविष्ठ नव्या अकर्म।
वस्त्रेव भद्रा सुकृता वसूयू रथं न धीरः स्वपा अतक्षम्॥
५.२९.१५॥

अत्र नव्या भद्रा सुकृता क्रियमाणा स्वपा अतक्षम् इत्यादीनि पदानि स्पष्टान्येव सचेतसाम्। मैत्रावरुणिर्वसिष्ठोऽपि, 'प्र ब्रह्म एतु सदनाद् ऋतस्य वि रश्मिभिः ससृजे सूर्यो गाः' (७-३६-१) 'सुवृक्तिमिषं न कृण्वे असुरा नवीयः' इति वदन्, एतमेवार्थं द्रढयति। वसिष्ठस्तु काव्यस्य सहजस्फुरणमपि द्योतयति,'—

इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः ।

अभ्राद् वृष्टिरिवाजनि ।। (७.९४.१)

इत्यत्र सुवृक्ति-शब्दोऽपि एतदर्थसूचको भवति ।

द्वितीयं तु, अत्र कवयः एककुलोत्पन्नाः पितृपुत्रपौत्रादिपरम्परया काव्यं कुर्वाणाः दृश्यन्ते । त एव कथयन्ति—

'ममा नो अर्कममृताय जुष्टं इमे धासु: अमृतासः पुराजाः' इत्यत्र ।

तृतीयं तु, कवय एव काव्यानि पुराणानि नवीनानि सन्ति इति स्पष्टमेव कथयन्ति । विश्वामित्रो वदति,—

यः स्तोमेभिर्वावृधे पूर्व्येभिर्यो मध्यमेभिरुत नूतनेभिः । (३.३२.१३)

ऋषीणां विषयेऽपि वदति वसिष्ठः—

ये च पूर्व ऋषयो ये च नूत्ना

इन्द्र ब्रह्माणि जनयन्त विप्राः ।। इति ७.२२.९

चतुर्थं च, अनुकरणमपि स्पष्टमेवात्र प्रतीयते । हिरण्यस्तूपः आंगिरसः वदति—इन्द्रस्य नु वीर्याणि प्रवोचम् । (१.३२.१) दीर्घतमा औचथ्योऽपि वदति—'विष्णोर्नु कं वीर्याणि प्रवोचम् ।' इति

पंचमं तावत्, अत्रापि दृश्यते प्रयत्नजनिता सा भणितिभङ्गिविच्छित्तिः, या लौकिककवीनां काव्ये सर्वत्रोपलभ्यते ।

संक्षेपतः या चापौरुषेयकल्पना मीमांसकैरन्यैर्वा स्वीकृता दृश्यते सा केवलं श्रद्धामूला न तर्कसंमता युक्तिगाढा वा, न वा वैदिककविभिः समर्थिता। काव्यं च, न निर्मितं चेति विप्रतिषिद्धमेतत्। कविः विप्रः ऋषिः इत्यादयः सर्वे शब्दाः कविशब्दसमानार्थकाः एव सन्ति। न कोऽपि सन्देहो वर्तते अस्मिन् विषये।

अत्र तावद् विचार्यं भवति, यदि ऋग्वेदे संहितारूपेणावस्थितं मण्डलादिव्यवस्थया विरचितं काव्यं पौरुषेयं भवति तर्हि एतत् काव्यं कैः कदा कुत्र च निर्मितमासीत्। न विद्यते विप्रतिपत्तिः अस्मिन् अवधारणे यत् आर्यैः निर्मितमिदं काव्यं मन्त्राश्च निर्मिताः सूक्तानि च तैरेव निर्मितानि। तथापि विद्यते एव विप्रतिपत्तिः, अद्यापि न दृश्यते मतैक्यं विदुषां तेषां कालस्थलविषये। सिन्धुसंस्कृतिविनाशकर्तॄणामार्याणामभवत् प्रवेशः सप्तसिन्धुप्रदेशे। ततश्चाभवत् तेषां संघर्षोऽन्यैः दासदस्युभिः सह। संघर्षावसाने तेषामार्याणां विजेतॄणां स्वाभाविकमेव सप्तसिन्धुप्रदेशे राज्यलक्ष्म्याः संस्कृतिलक्ष्म्याः वा स्थैर्यं संपंन्नं समुत्पन्नं च। सर्वोऽयं वृत्तान्तः इतिहासस्वरूपः सर्वेषां सुविदित एव।

अत्र च भवति संदेहः, कुत्र वर्तमानैरार्यैः काव्यमेतत् निर्मितम्, रचना चास्य कृता। प्राक् सप्तसिन्धुप्रवेशादेव तैः परिभ्रमणशीलैः परिभ्रमणावस्थायां निर्मितमेतत्। आहोस्वित् सप्तसिन्धुप्रवेशानन्तरं लब्धस्थैर्यैस्तैस्तन्निर्मितम्।

अस्मिन् विषये विचिन्त्यमाने एतदपि अस्माभिश्चिन्तनीयम्। काव्यस्य तन्निर्मातॄणां जीवनस्य च वर्तते कार्यकारणरूपः संबन्धः। न केवलं दृश्यन्ते काव्ये कल्पनाः जीवनोद्भूताः परंतु काव्यस्वरूपमपि

तन्निर्मातृव्यक्तिसमूहजीवनस्वरूपमनुकरोति । अत्र यन्ममाभिप्रेतं तत् स्पष्टीक्रियते । परिभ्रमणावस्थायामार्याः संकीर्णस्वरूपाः आसन् यत्र तत्र वर्तमानाः अश्वारूढाः जिष्णवः संपन्नतरवसतिस्थानलाभार्थं परिक्रमन्तः आक्रमन्तश्च । अतस्तेषां काव्यमपि संकीर्णस्वरूपमासीत् । अवश्यमेव तैः अस्यामपि परिभ्रमणावस्थायां काव्यं निर्मितमासीत् । यतः काव्यस्य तावत् भवति घनिष्ठः संबंधः धर्मेण सह, मायया यातुना सह, मानवहृदये चिरनिवासशीलया सौन्दर्यभावनया सह । सर्वेऽपि मानवसमूहाः तेषां तेषां प्रथमावस्थायां वनेचरत्वेन विद्यमाना अपि, प्रभातकाले वयांसीव मधुरैरालापैः जुगुञ्जुरिति दृश्यते । गद्यं तावत् बुद्धिप्रधानं भवति कृत्रिमं, काव्यं तु भावनासंबद्धं भवति स्वाभाविकम् । अतएव मानवस्य प्रथमसंलापाः काव्यस्वरूपाः आसन् । तस्मान्न तच्चित्रमाश्चर्यावहं यदार्या अपि, यद्यपि प्राक्-सप्तसिन्धुप्रवेशकालात् परिभ्रमणावस्थायामासन्, ईराण आर्याणां देशेऽपि आसन् तथापि काव्यं चक्रुः । स्वाभाविकमेव तत् ।

यदा तु सप्तसिन्धुप्रवेशानन्तरमिन्द्रस्य आधिपत्येन नेतृत्वेन च तैः स्थैर्यं लब्धं तदा तेषां काव्येनापि स्थिरस्वरूपं लब्धम् । यादृशी व्यवस्था तेषां समूहेषु तैर्निर्मिता तस्या एव अनुकरणं मन्ये तैः काव्य-संपदः स्थैर्यनिर्माणविषये कृतम् । आर्याणां समूहाः कुलस्वरूपेण संघटिताः आसन्, अतः काव्यमपि तत्सूत्रानुरोधेन मण्डलस्वरूपे रचितमभवत् । अग्निपूजा तेषां प्रथमतः एव आसीत्, पश्चात् आगता इन्द्र-पूजा, नाप्यासीत् विस्मृतो वरुणः । अतो मन्ये अनेनैवात्र निर्दिष्ट-देवतास्थानक्रमेण मण्डले मन्त्राणां सूक्तानां च संनिवेशोऽभवत् । मण्डलं नाम एककुलोत्पन्नानां कवीनां काव्यसंग्रहः । नवमं मण्डलं तु अपवादस्वरूपं भवति यतस्तस्मिन् विविधकुलोत्पन्नकवीनां सोम-

काव्यं निहितं दृश्यते। किन्तु रचनाविषयको निर्बन्धस्तत्रापि दृश्यते। अनेनैव प्रकारेण यदा यथा च संकीर्णस्वरूपेण परिभ्रमणशीलानामार्यसमूहानां सप्तसिन्धुप्रदेशे संहितीकरणं जातं तदा तथाच, संकीर्णस्वरूपे विद्यमानस्य काव्यस्यापि संहितीकरणं संजातम्। मन्ये न तत् कथनमावश्यकं यत् सप्तसिन्धुप्रवेशानन्तरमपि तैः काव्यं निर्मितम्।

ऋग्वेदे उपलभ्यमानं काव्यं यद्यपि प्राचीनतमं तथापि न तत् तावत् प्रथमम्। अयं प्राचीनतमः कालः मन्त्रकाल इति शब्देन वर्णितो भवति। परवर्तिकालद्योतनार्थमनुकरणकाल इति शब्दप्रयोगः उचितः स्यात्। मन्त्रकाले निर्मितं काव्यं प्रथमं कृतमिव प्रयोगस्वरूपमिव तथापि तस्य प्रत्यग्रतया एव आकर्षकं मनोहारि चासीत्। न तस्मिन् काले संजाताः कविसमयाः वा भणितिपद्धतयो वा। मार्गसंशोधकाः रीतिनिर्मातारः एव ते प्रथमे कवयः। नासीत् तेषां पुरतः काव्यं यस्यानुकरणं तैः कृतं स्यात्। यद्यपि आसन् छन्दांसि प्रयुक्तानि तथापि तत्र सहजता एव गुणः, न निर्दोषता नाम। परवर्तिकालस्तु अनुकरणप्रधानो भवति। अस्मिन् काले वर्तमानानां कवीनां पुरतः मन्त्रकाले निर्मितं काव्यमासीत् यस्य तैरनुकरणं कृतम्। यद्यपि अस्मिन् काले काव्यं रचनाकुशलतया अधिकतरं रमणीयं भवति, तथापि अत्र न सा प्रत्यग्रता वर्तते या मन्त्रकालनिर्मितकाव्ये आसीत्। अनुकरणे अपरिहार्या कृत्रिमता। अतः यद्यपि अस्मिन् द्वितीये कालखण्डे निर्मितं काव्यं चारुतरमधिकतरं निर्दोषं कविसमयप्रयोगरुचिरं तथापि न तत्र मन्त्रकाव्यसामर्थ्यमोजो वा दृश्यते। कुतो वा उपवनलतासु वनलतासौन्दर्यसंभवः। स्वसंवेद्योऽयं विषयः न प्रतिपादनेन केवलेनात्र प्रत्ययो जन्यते। तथापि ऋग्वेदे एव तत् सर्वं दृश्यते। ऋग्वेदे उपलभ्यमानं

काव्यं प्राधान्येनानुकरणकाले एव निर्मितं दृश्यते । यतः कविसमयप्रधानं तद् दृश्यते । अनुकरणं तत्र भूरि दृश्यते । यथाहं पश्यामि अतीतो मन्त्रकालः प्रारब्धमनुकरणयुगमिति ।

ये चैते कवयः आसन् के ते ? किं संघर्षशीलाः उग्राः योधास्ते आसन् ? यद्वा यज्ञतन्त्रकुशलाः पुरोहिताः आसन् । प्रत्युत राजसभामलंकुर्वाणाः नृपवन्दिनो मागधाः वा आसन् । सन्ति चास्मिन् विषये विदुषां विप्रतिपत्तयः ।

ओल्डेनवर्गहिलेब्रांड्टमहोदयाः मन्यन्ते-पुरोहितैः यज्ञार्थं निर्मितं काव्यमृग्वेदे वर्तते । प्रथमावस्थायां वर्तमानैः पुरोहितैरेतत् काव्यं निर्मितम् । नासीत् तस्मिन् काले देवमूर्तिर्न वा देवालयसंभवः । किंतु यज्ञार्थं प्रज्वलितेऽग्नौ, आस्तीर्णे च बर्हिषि, सुते च सोमे देवानां निमन्त्रणार्थं निर्मितमेतत् काव्यम् । अश्वारूढाः वा रथाधिष्ठिता एते देवाः, सोमपीतये वा आहुतिस्वीकरणार्थं वा अन्तरिक्षात् यज्ञस्थानं दिने दिने आगच्छन्ति । एते पुरोहिताः पुरातनीं पद्धतिमनुसृत्यैव काव्यं कुर्वन्ति रचयन्ति वा । तत्प्रयोजनं तु सोमयागे विनियोगः । यद्यपि न विद्यते तेषां नैसर्गिकी विमला च प्रतिभा तथापि विद्यते एव तेषां प्रभुत्वं परम्पराप्राप्तेषु कविसमयेषु पुरोहितपरिचितेषु । यानि कानि विद्यन्ते विशेषणानि भाषायां तानि सर्वाणि प्रायः प्रयुज्यन्ते पुरोहितैः देवतावर्णनस्तुतिप्रसंगे विना विमर्शम् । अत्र काव्यविषयः अस्पष्टस्वरूपाः प्रकाशात्मकाः देवाः, काव्यं विशेषणप्रधानमतिशयोक्तिरंजितं ब्रह्म, प्रयोजनं तु पुत्रधनपशुरूपेण लाभः यजमानस्य, दक्षिणारूपेण च पुरोहितानाम् । न चात्र उदात्तता दृश्यते न काव्ये न वा देवकल्पनायाम् ईदृशं द्रव्यार्थसंयुतं काव्यार्थहीनं काव्यं यज्ञकर्मकुशलाः दक्षिणारताः

पुरोहिता एव निर्मातुं प्रभवन्ति । यद्यपि केषुचित् सूक्तेषु दृश्यते रमणीयं काव्यं तथापि तदपवादरूपमेव । अतः पुरोहितैरेव निर्मितोऽयं ऋग्वेदः । न केवलमेवमुक्त्वा विरेमुरिमे महाभागाः । ऋग्वेदनिर्माणसमये इमे पुरोहिताः येषामयं धर्मः, इदं काव्यं, अयं यत्नः ते वनेचराः संस्कृतिदेहलीमनतिक्रान्ताः आसन् इति बभ्रमुः ।

ब्लूमफील्डमहोदयानां मतं त्वीदृशं दृश्यते । यद्यपि पुरोहिताः एव ऋग्वेदकाव्यस्य निर्मातारस्तथापि वर्तन्ते एवात्र रसगुणालंकारादयः तत्त्वज्ञानविमर्शसौन्दर्यानुभूत्यादयः सर्वेऽपि उत्तमकाव्यविशेषाः । सत्यमेव तद् यदेते मन्त्राः यज्ञे देवानां निमन्त्रणार्थमेव रचितास्तथापि ऋग्वेदस्य अपूर्वत्वं महत्त्वं च, न तस्य काव्यगुणतो न वा यज्ञसंबन्धतः । अत्र यत् तत्त्वज्ञानं दृश्यते तेनैव हि अस्यापूर्वता । प्रकृतेर्भिन्नाः शक्तयो देवरूपेण परिणामिता आसन् आर्यैः । तेषां पुरोहितकवीनां पुरतो वर्तते प्रवर्तते च सततं यज्ञः, तथापि काले यूपाद् विमुक्ता एतेषां प्रतिभा, गगनमपि स्पृशति । यद्यपि यज्ञार्थनिर्मितेषु एतेषु मन्त्रेषु दृश्यते तन्त्रबद्धा रचना, वर्तन्ते च पुनरुक्त्यादयो दोषाः तथापि अत्रैवोपलभ्यते रमणीयार्थप्रतिपादकशब्दात्मकं रसात्मकं च काव्यम् । यद्यपि पुरोहितानां चेतांसि यज्ञरतानि भवन्ति, तथापि तैरपि दृष्टं अनुभूतं च दृश्यते अरण्यपर्जन्यादीनां नदीपर्वतानां चन्द्रसूर्यादीनां च सौन्दर्यं, गाम्भीर्यं, सामर्थ्यमपूर्वत्वं च । यथा ते एव कथयन्ति पतन्ति तेषां मनांसि "यत्र वयश्चन पतयन्तः पतत्रिण (१.१५५.५) इति । न दृश्यते पृथिव्यामन्यत्र कुत्रापि, यज्ञार्थप्रयुक्तमीदृशमपूर्वं रमणीयं काव्यम् । अत्र महत्त्वं न यज्ञस्य किन्तु वर्तते देवस्य । अत्रापि दृश्यन्ते कवीनां काव्यनिर्माणोत्साहानन्दगर्वादयः । धर्मभावनापरिपूर्णमेतत् काव्यं नन्वविस्मरणीयम् । अतः यद्यपि पुरोहितानामियं कृतिः तथापि न तावता एव कारणेन कदर्थनीया भवति ।

अडोल्फ-केगी-महोदयास्तु, ऋग्वेदकाव्यसौन्दर्येण सर्वथा अभिभूताः दृश्यन्ते। तेषां मते ये गुणाः साहित्यशास्त्रविशारदैः उत्तमकाव्यगुणेषु आवश्यकत्वेन प्राणत्वेन च पठिताः सन्ति, ते सर्वेऽपि ऋग्वेदकाव्ये प्रकर्षेण विद्यन्ते। अर्थाभिव्यक्तिप्रसादमाधुर्यादिभिः अलंकृतमिदं काव्यम्। यच्च ऋग्वेदे अनुकरणं कृतं कविभिर्दृश्यते, तत्तु सौन्दर्य-लालित्यादिनिर्माणार्थमेव। अतएव कवयः काव्यसमयानाश्रयन्ते। ते च कविमार्गं रचयन्ति अनेनैव प्रकारेण। काव्यं नाम सौन्दर्याभिहृतस्य हृदयस्य सहजोद्गारः। प्रबलतमभावनायाः उचितेन ललितोद्गारेण वाग्रूपेण अभिव्यक्तिः। अपारस्य गूढस्य अनुभूतस्य अव्यक्तस्य च तत्त्वस्य शब्दस्वरूपेण व्यक्ततामापन्नत्वम्। शब्दब्रह्मणोऽयं परिणामो विवर्तो वा। इष्टदेवताचिन्तनाद् भक्तिभावपरिपूरितहृदयः कविः, देवतासंयोजितेन मनसा, तस्याः आराधनार्थं काव्यं करोति न एते पुरोहिताः, ये यज्ञार्थं निरर्थकान् दक्षिणालोभेन रचयन्ति मन्त्रान्। कवयोऽत्र स्वत एव कथयन्ति बुद्धिपूर्विकां काव्यस्य रचनाम्। यथा तक्षा रथनिर्माणे दत्तहृदयः सर्वांगपरिपूर्णां सुन्दरां प्रयोजनसाधनसमर्थां कृतिं करोति, तथैव कविरपि स्वीयं काव्यं करोति। भवति च ब्रह्म-निर्माणे वैदिककवीनामुपमा 'रथं न धीरः स्वपा अतक्षम्' इति।

प्रथमावस्थायां विद्यमानोऽपि मानवः स्वभावत एव, धर्मभावना-भिभूत आसीत्। अतएव स कविः 'बाल्ये तिष्ठन्' आसीत्। अतएव तस्य काव्यं सौन्दर्यदर्शनजनितेन आश्चर्येण सिक्तं पूरितं वा दृश्यते। ऋग्वेदस्य महत्त्वं तु धर्मभावनाजनितकाव्यस्वरूपतो विद्यते। नूनं रसिकवर्याः सहृदयाः सन्ति केगीमहोदयाः।

ऋग्वेदप्रकाण्डपण्डितानां गेल्ड्नरमहोदयानामपि मतमवश्यमेवा-त्रोल्लेखनीयं भवति। ऋग्वेदे काव्यनिर्माणरतां कविपरम्परां ते

पश्यन्ति। परिपालिताः दृश्यन्ते अत्र केचन कविसमयाः काव्यनियमाश्च। पितृपुत्रपरम्परया वा गुरुशिष्यपरम्परया वा अत्र काव्यनिर्मितिः संजाता। एते कवयो वन्दिन आसन्। तैश्च निर्मितमिदं काव्यं नृपस्य वा मघोनः सभायाम्। न वेदं काव्यं यज्ञशालायां निर्मितं न वा प्रकृतेः सान्निध्ये। वारंवारमेते कवयो मघवन्तं स्तुवन्ति। मघवद्भिः संरक्षिता एते सूतमागधस्वरूपाः, तैः क्रियमाणयज्ञार्थमपि सूक्तानि रचयन्ति। तस्मिन् काले आसन् काव्यनिर्माणप्रतियोगिता अपि। आसन् च प्रतियोगितासु अध्यक्षत्वेन नियुक्ताः सूरयः। नृपाणामासीत् विलासभोगप्रचुरं जीवनं यस्य चात्र प्रतिबिम्बं दृश्यते। गणिकायाः सौन्दर्यं नृत्यादिविलासोऽप्यत्र वर्णितो दृश्यते। आर्याणां यदासीदनिर्वन्धजीवनं, तस्य छाया अत्रापि काव्ये दृश्यते। अतो वन्दिमागधैरेव निर्मितमिदं काव्यम्।

अनेन प्रकारेण दृश्यते वैदिककवीनां यथार्थस्वरूपविषये मतवैचित्र्यम्। केचन मन्यन्ते तान् यज्ञधूमाकुलितनयनान् पुरोहितान्। अन्ये चाहुः तान् प्रकृतिसौन्दर्यमुग्धान् कवीन्द्रान्। अपरे मन्यन्ते तान् धर्मकवीन्। केचन तान् मन्यन्ते मघवत्सभायां विद्यमानान् वन्दिमागधान्। किमत्र सत्यं स्यात्।

यथाहं पश्यामि, समन्वयः 'मज्झिमपरिषदा' एव, यथा सर्वत्र, तथा अत्रापि साधीयान्। यद्यपि ऋग्वेदे दृश्यते मानवः प्रथमावस्थायां विद्यमानस्तथापि संस्कृतिसंस्कारसंपन्न एव सः। मन्येऽस्मिन् विषये प्रायः अभ्यासकानां पिहिता भवति दृष्टिः आत्मीयपरकीयपट्टबन्धाभ्याम् अन्यतरेण पट्टबन्धेन। प्रथमावस्थायां न भवति भेदः धर्ममायायातुवैद्यकादीनाम्। यो हि पुरोहितः स एव वैद्यश्चिकित्सकः स एव मायावी वा यातुधानः। सर्वेऽपि एते यजमानस्य

कृते वा चिकित्सितस्य कृते स्व-स्व-व्यापारान् निर्वर्तयन्ति । अतएव भवति मायाप्रयोगे वा यज्ञप्रयोगे वा प्रयोज्यानां मन्त्राणां समान-धर्मता । यथा मायावी मन्त्रान् पठित्वा ईप्सितं फलं निष्पादयति, तथैव पुरोहितोऽपि यज्ञे मन्त्राणां प्रयोगं कृत्वा यज्ञफलं निष्पादयति । मायाप्रयोगे च भवति अनन्यसाधारणं महत्त्वं यथार्थोच्चारणस्य पुनरुक्तेश्च मन्त्राक्षराणां च तेषां क्रमस्य । भवति च तेषामपि स्व-कीया विशिष्टा परम्परा । केषांचिदक्षराणां अक्षरसमूहानां वा पौनःपुन्येन प्रयोगः सामर्थ्यजनकत्वेन क्रियते मायामन्त्रेषु । एतदेव ऋग्वेदकाव्यमन्त्रेषु दृश्यते । अन्यच्चालंकरणमिति शब्दप्रयोगोऽपि एनामेव कल्पनां दृढीकरोति । अलमिति वस्तुतः सामर्थ्यसंपन्नता-वाचकं पदम् । सामर्थ्यं च फलनिर्माणविषये संपन्नता च संपूर्णा-ङ्गत्वात् । मायाप्रयोगे पठितेषु मन्त्रेषु कंकणादिरूपं किंचिद् वस्तु प्रयोगविषयीभूते यजमाने वा पशौ वा निहितमासीत् । अतएव लक्षणया अलंकरणशब्दप्रयोगः कंकणादिष्वपि रूढः । काव्येऽपि एतादृशैः साधनैः भाषाविशिष्टार्थाभिधानैः समर्था वा वाक् सौन्दर्यादि-गुणसंपन्ना भूषणप्रयोगैः संपद्यते । अतएव, एतेष्वपि 'अलंकार' इति शब्द-प्रयोगः लक्षणया । वस्तुतस्तु स मायासम्बन्धस्मारकः । धर्म-परम्परा वा यज्ञपरम्परा वा ऋग्वेदे उपलभ्यते अथर्ववेदे च माया-परम्परा । अनयोः संमेलनेनोद्भूता ऋग्वेदकाव्यपरम्परा, कवि-परम्परा च । यज्ञेऽपि मायास्वरूपं वर्तते एव ।

अन्यच्च सर्वत्रैव प्राचीनमानववंशेषु समूहेषु वा वीरपूजनं समूह-नेतुर्वीरस्य देवताकरणं प्रायो दृश्यते । ततश्च तस्य स्तवनं वीर्यवर्णनं च कविभिः क्रियते । एषा तु अवस्था मायावस्थानन्तरं प्रायो दृश्यते । यश्च 'विश्वस्माद् उत्तरः' भवति तस्य स्तुतिः देवताकरणं चापरिहार्यमेव

भवति । अतएव चाह वैदिकः कविः 'इन्द्रस्य नु वीर्याणि प्रवोचम्' 'स जनास इन्द्रः' इति । प्राग्वीरकालात् प्रायः 'असुरस्य माया' कविभिर्वर्ण्यन्ते । 'असुर' इति शब्दः प्राचीनः सामर्थ्यसूचको देववाचकश्च । अतएव वरुणविषये संप्रयुज्यते । 'असु' नाम किंचिदद्भुतं द्रवरूपं द्रव्यं तदस्यास्तीति असुरः । वीरकाले भवन्ति वीरकृताः संघर्षाः तैर्लब्धो यस्तेषां गुणोत्कर्षस्तेषां विस्मयावहं जीवनमित्यादयः काव्यविषयः । प्रथमे कालखण्डे देवो वा वीरो वा मायावीति वर्ण्यते यतः तस्य सामर्थ्यं मायाप्रयोगतः संप्रवर्तते । वीरकाले तु तस्य सामर्थ्यं प्राकृतिकेभ्यो मानवगुणेभ्यो धैर्यशौर्यादिगुणसमुदायतः संप्रवर्तते । स चामृतत्वेन गृह्यते अतएव तस्य वर्णनम् 'अमर्त्यः मर्त्येषु आ' इति क्रियते । तस्य चरित्रं आजन्मनः भवति चाश्चर्यहेतुः, सामर्थ्यं च विस्मयहेतुः, कृतयो भवन्ति आनन्दहेतवः । या मायाकाले 'माया' आसीत् सा अधुना शचीरूपेणाविर्भवति । सामर्थ्यार्थं ये ये सामर्थ्यप्रतीत्युत्पादकाः प्रत्ययाः निसर्गतः उपलभ्यन्ते तेषां प्रयोगोऽत्र क्रियते । अतएव उपलभ्यन्ते वीरवर्णने प्रयोगाः, 'मृगं न भीमः' श्येनः, वाजी, वृषभः, तार्क्ष्यः इत्यादयः । अयं नूतनः वीरः प्रायः नृपत्वेनापि गृह्यते, प्रशस्यते च । भवति 'राजा' । तस्य च कार्यं समूहरक्षणमनुयायिपालनं कर्मव्यवस्था सुरक्षा च । प्रथमावस्थायां, मानवसमूहस्य नृपस्य नेतुः वा प्राधान्येन द्वे कर्तव्ये, धर्मरक्षणं देशरक्षणं च । अतएव च, इन्द्रः अग्निः सोमादयः सर्वेऽपि देवा, एते कर्मणी कुर्वाणा दृश्यन्ते ऋग्वेदे । अतएव मन्त्रे, यथा देवताविषयकविचारे क्रियमाणे अतीतो वरुणकालः समायातश्चेन्द्रकालः इति वक्तुं शक्यते तथैव अतीतं मायायुगं संप्रवृत्तं वीरयुगमित्यपि वक्तुं शक्यते । अतएव च य 'इन्द्रः मायाभिः पुरुरूप ईयते' स एव 'शतमूर्तिः शचीपतिः' इति वर्ण्यते । तस्याद्भुतकर्माण्यपि नदीपर्वतसर्जनस्थिरीकरणादीनि तथैव धर्मदेशरक्षणार्थं कृतानि वृत्रहननादीनि सप्तसिन्धुवासिनां कृते कृतानि

नदीजलविमोचनादीनि कार्याणि वर्ण्यन्ते। देवाः अत्रास्मिन् वीरयुगे 'शूरो न गोषु' इति वर्ण्यन्ते। या वैदिककवीनां वृत्तिः सा भट्टमोक्ष-मूल्लरेण 'पर्यायदेवतावाद' शब्देन उपलक्षिता, यथाहं पश्यामि वीर-युगस्यैष परिणामः स्वाभाविकः। मायायुगं, ततः परं शचीयुगं, ततः परं वयुनयुगं वा ज्ञानयुगं वेति त्रीणि युगानि ऋग्वेदे दृश्यन्ते। अतीतस्य मायायुगस्य छायाः अत्र संदृश्यन्ते। शचीयुगं तु वर्तमानत्वे-नावभासते, तस्य च वयुनज्ञानयुगे भाविपर्यवसानमपि लिङ्गैः सूच्यते। वीरकाव्येऽपि दृश्यन्ते पदानां पुनरुक्तयः, वाक्यखण्डानां नामविशेष-णादिसमूहानां पौनःपुन्येन संप्रयोगः, यथा महाकविहोमरनिर्मित-महाकाव्ये, यथा च रूस-युगोस्लाव्ह-काराकिरगिज-याकुत-कालमुकादी-नां वीरकाव्येषु च। एभिः परम्पराप्राप्तैः पुनः पुनः प्रयुज्यमानैः काव्य-खण्डैरनेकविधं कार्यं संपाद्यते। एकतः काव्ये तानि तान्येव पदानि पुनः पुनः दृश्यमानानि परिचयभावनामुत्पादयन्ति। कविपरम्परायाः रक्षणमप्यनेन प्रकारेण भवति। यतः तस्याः प्रयोगैः स्थैर्यं संजायते। स्थैर्यप्रियत्वं नाम प्रथमावस्थायां वर्तमानानां मानवानां प्रधानगुणः। अतएव रामायणे महाभारतेऽपि अनेकविधाः पुनरुक्तयः दृश्यन्ते। एषा प्रवृत्तिः ऋग्वेदेऽपि दृश्यते वीरकाव्यत्वात्। गाथानाराशंसीत्या-दिषु लोककाव्येषु इतिहासपुराणादिषु दृश्यमाना सूतमागधकवीनामेषा प्रवृत्तिः सार्वजनीना सार्वकालिकी च।

अन्यच्च ऋग्वेदे उपलभ्यमानं काव्यं प्राधान्येन कुलकाव्यं, यतः मण्डले समानगोत्राणामृषीणां काव्यमेकत्र निहितं दृश्यते। अतएवेदं काव्यं वंशतः आर्याणां कुलतो भिन्नभिन्नगोत्रीयाणामिति वक्तुं श-क्यते। मानसशास्त्रविदो वदन्ति 'भवन्ति काश्चित् कल्पनाः साधारणा एकवंशीयानाम् तथैव भवन्ति काश्चित् एकगोत्रजानाम्, भवन्ति च

अनन्याधीनकल्याणान् भक्तकल्याणवर्षकान् ।
योगीन्द्रान् सद्गुरून् वन्दे श्रीनृसिंहसरस्वतीन् ।।

गते व्याख्याने विमृष्टं मया विविधसंस्कारसंपन्नं वैदिककवीनां मनः । अधुना विमृश्यते वैदिककवीनां साहित्यशास्त्रं यद्ययं प्रयोगस्तेषां काव्यकल्पनासमीक्षणस्य समुचितो भवेत् श्लिष्येत चेत् सचेतसां मनसि । किमासीत् तेषां प्रयोजनं काव्यनिर्माणे । को वासीदिष्टः काव्यपरिणामोऽभिमतश्च तेषाम् । कीदृशी वासीत् तेषां दृष्टिः स्वकाव्यविषये । समुपजायन्ते एवंविधाः प्रश्ना ऋग्वेदगतकाव्यस्याध्येतुर्मनसि । मन्ये च एतद्विषयकमन्वेषणमावश्यकमपि भवति फलप्रदं चापि । प्रथमतस्तावद् यदि वैदिककाव्यस्य सम्यगर्थाधिगमार्थमस्माभिः प्रयतितव्यं स्यात्, तदैतेषां प्रश्नानामुत्तराण्यप्यन्वेष्टव्यानि भवन्ति । तदैव संभवति कविप्रयोजनस्य सम्यगवधारणम् । कविप्रयोजने हि सम्यगवधारिते सत्येव संभवति सम्यक् काव्यार्थावधारणम् । अयमर्थ ईदृशेन प्रपंचेनात्र मया कथितो यतो दृश्यते काव्यपरिशीलने एषा प्रवृत्तिरनेकेषां यद् यः काव्यस्यात्मा यच्च कविप्रयोजनं यो वा कवेर्भवत्यभिमतो भावस्तमुपेक्ष्य विस्मृत्य वा केवलं भाषाया रीतेर्वाऽध्ययने मतिर्दीयते । रीतेरध्ययनस्य विषये तन्महत्त्वस्य विषये वा न सम्भवति विवादो मतभेदश्च । तथापि नैव विस्मर्तव्यं यद् रीतिर्वा भाषा वा केवलाऽर्थवाहिकैव, रसस्याङ्गिन्येव । रीतिरलंकारादि प्रपंचो वा केवलं साधनीभूत एव, फलं तु कविप्रयोजनमभिमतस्यार्थस्याभिव्यक्तिः, रसस्य स्वीकृतस्य च सम्यक् परिपोषः । अत्रापि न

त्वेन गृह्यन्ते । अतएव विविधाः देवकथाः संजायन्ते । एतदेव ऋग्वेदकवीनां मनसः, काव्यस्वरूपस्य, तैः प्रयुक्तदैवतकथाशब्दप्रयोगोपमारूपकादीनां च स्पष्टीकरणम् ।

ग्रन्थगतकाव्यमध्येष्यमाणानां भवत्यवधारणं कविमनसोऽप्यावश्यकम् । तेन विना न संभवति सम्यगधिगमः काव्यार्थस्य । काव्यं नाम प्रामुख्येन कविमनसो विलासः आविष्कारश्च । ये ये भावास्तस्मिन् स्फुरन्ति' तेषां तेषां शब्दस्वरूपापत्तिरेव काव्योत्पत्तिः । अतएव मया ऋग्वेदीयकविमनसः पृष्ठभूमिनिर्धारणार्थमयं प्रपञ्चः कृतः । सन्ति च बहुविधाः काव्यप्रेरणाः काव्यप्रयोजकाश्च । धर्ममायायातुवीरकाव्यप्रवृत्तीनां संमिश्रः परिणामः अत्र दृश्यते । अद्य अत्र ऋग्वेदीयकविमनः कीदृगासीदित्येतदस्माभिः विमृष्टम् । श्वो द्रक्ष्यामः के आसन् वैदिककवीनां काव्यविषयकाः सिद्धान्ताः, किं वा प्रयोजनमुद्दिश्य तैर्निर्मितं काव्यम् । किं वाऽऽसीत् तेषां भूमिका काव्यप्रक्रियाविषये ।

अत्र यच्च कथितं मतं मया वैदिकर्षिकविकाव्यविमर्शे ।
रुचये यदि तत् सचेतसां सफलो ननु मे परिश्रमः ॥

इति भवतां संप्रार्थ्येदानीं विरम्यते ।

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विद्यापीठम्

शारद–ज्ञानमहोत्सवे

द्वितीयं व्याख्यानम्

२२-३-१९६९

वैदिककवीनां काव्यविचारः

संभवति विवाद इति मन्ये । भाषाया गौणत्वं तु काव्ये स्पष्टमेव । मानवस्य चेतसि ये ये भावा उत्कटा समुत्पद्यन्ते, ते सर्वेऽपि काव्य-विषया भवन्ति । किन्तु, सर्वत्र भाषाया असामर्थ्यमनुभूयत एव । कविर्दयिता, भक्तो वक्ता चैते सर्वे भाषां पुनःपुनरपि प्रयुञ्जाना असन्तुष्टा एव दृश्यन्ते । यतः न विद्यते स्वरूपतस्तत्सामर्थ्यं भाषायां येन सा सकलभावप्रकटनक्षमा समर्था वा भवेत् । अतएव जीवने यदा यदा किंचिदुत्कटमनुभवति मनुष्यस्तस्य आविष्कारेऽसमर्थः सन् मौनमेव भजते सः । ईदृशाः प्रसंगा वाचालमपि मूकं कुर्वन्ति । अतएव तत्त्वदर्शिभिः साधूक्तं यत् 'मौनं ब्रह्म' इति । भाषायामीदृशं विद्यमानमसामर्थ्यमशक्तिं वा वीक्ष्य, एव तदलंकरणे प्रयत्नः क्रियते कविभिः । भाषामलं-समर्थां-करणं सम्पादनमेव सर्वकविव्यापारस्य प्रयोजनम् । अलंकृता हि वाक् समर्थतयार्थाभिव्यक्तिं करोति । वैदिक-कविः तां 'शुक्लवर्णा द्योः' (१. १४. ७.) इति वर्णयति । मायावो कविर्वा भाषां तावत् प्रथमं समर्थां करोति, ततश्च वाञ्छितं फलं निष्पादयति । पुरोहितोऽपि भाषां वा पशुं वा यजमानं वा 'अलं' 'अरं' करोति । सामर्थ्यं कस्मिन् विषये स्यात्, किं वा साधयितुं यतते कविः । यत्सौन्दर्यं दृष्टं यत् किंचिद् गूढमनुभूतं यद् वा किंचिद्दिव्यं स्पृष्टं, तस्य तस्य वर्णने प्रायः कविजातिर्बद्धादरा बद्धपरिकरा च भवति । अभि-मतस्यार्थस्य व्यक्तीकरणे यतमानास्ते स्वकीयां कृतिमपि शंसन्ति । न त्वत्र दर्पो गर्वो वा शङ्कनीयः । एतदपि स्वाभाविकमेव यदभिमतमर्थं समर्थतया साधयत् साधनमपि प्रियं भवति । अतएव ऋग्वेदे कवयः स्वनिर्मितं काव्यं प्रशंसन्तो दृश्यन्ते । यत्तूच्यते ऋग्वेदकाले आर्याः कवयो वा प्राथमिकावस्थायामासन्, न तेनेदं व्यज्यते यत्ते सर्वथा सौन्दर्यपावित्र्यगाम्भीर्यमांगल्यादीनामनभिज्ञा आसन् । यतोऽध्यात्म-मपि तेषां भूरि चिन्तनं दृश्यते ।

वैदिकऋषयः अहमहमिकयैवेन्द्रादीन् देवान् वशीकर्तुं वाञ्छन्ति। अस्माकमेव यज्ञम् 'आ गहि सोमपीतये' नेतरेषामेवंरूपा च भवति तेषां प्रार्थना सततम्। जानन्ति च ते निजप्रार्थनाया गुणवत्ताम्। प्रार्थना नाम ब्रह्म धीः सुवृक्तिः।' प्रार्थनाया उत्कटत्वात्, गुणवत्त्वाच्च ते इच्छन्ति प्रीणयितुं देवान्। संक्षेपतः काव्यसौन्दर्यप्रशंसनेन ते देवेषु रुचिमुत्पादयन्ति। न तच्चित्रं यत् काव्यस्येदृशं महत्त्वं विजानद्भिः तैस्तदधिष्ठात्री देवताऽपि निर्मिता। काव्यं कुर्वाणा रचयन्त आत्मवर्तिनीं निगूढां प्रेरयन्तीं शक्तिमपि विजानन्ति। यत्र यत्र काव्यं जायते, तत्र तत्र एषैव प्रक्रिया जगति दृश्यते।

प्रथमं कविभिः काव्यं क्रियते, पश्चाद् जायन्ते कविसमयादिकाः ततश्च संजायते काव्यस्य शास्त्रम्। काव्यदेवताकल्पनाऽप्याविर्भवति। अस्मिन् सन्दर्भे नवमे मण्डले यत् 'सूर्यस्य प्रियं दुहितुः तिरो' इत्यादिना सूचितं भवति, तदुद्बोधकं भवति। यतोऽत्र सूर्यस्य दुहिता काव्यदेवतात्वेन व्यज्यते। सर्वत्र सोममण्डले यत् मधुच्छन्दो-वैश्वामित्रेण उक्तं।

'पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता। वारेण शश्वता तना।' (९.१.६)

यद्वा अन्यैः कविभिरुक्तं।

'धिया पवते सोमः।' (९.७२.४)

'इन्दुः पविष्ट चेतनः प्रियः कवीनां मतो। सृजदश्वं रथीरिव।'

(९.६४.१०)

'वाचो जन्तुः कवीनां पवस्व सोम धारया' (९.६७.१३)

तद्द्रष्टव्यम्।

अत्र सर्वत्र, ईदृशेषु वचनेषु काव्येन वाग्व्यापारेण सोमः पूतो भवति स्वच्छो भवतीति सूचितं, तदस्मिन्संदर्भे उपयुक्तं भवति। सूर्योऽपि गन्धर्वरूपेण वर्णितः, भवति च कवीनां पिता वा गुरुः। अन्यच्च, सूर्यादेव शुक्लयजुर्वेदः निःसृत एतदप्यत्र स्मर्तव्यम्। अत एव सूर्यः सूर्यस्य दुहिता सोम एतत्त्रयं कविमति-प्रेरकमिति भाति। सायणाचार्यैः, उषा एव सूर्यस्य दुहिता इति गृहीतम् ; किन्तु ओल्डन-बर्गमहोदयैरेतत् न स्वीकृतम्। यतः उषस्तु भवति दिवो दुहिता, न सूर्यस्य। गेल्डनरहिलेब्रांड्महोदयास्तु सायणाचार्यमनुयन्ति। सूर्या च भवति पत्नी अश्विनोः। न तु तथात्वेन उषा वर्ण्यते। किन्तु उभयोरपि देवतयोर्दिवो दुहितुः सूर्यस्य दुहितुश्च वाग्देवतया सह काव्येन च, संबन्धोऽनेकशः सूचितो भवति ऋग्वेदे।

ससर्परीरमतिं बाधमाना बृहन्मिमाय जमदग्निदत्ता।

आ सूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्यम्' ।। इति

(३.५३.१५)

अत्र तृतीयमण्डले सूर्यस्य दुहिता ससर्परीत्वेन गृहीता, ससर्परी च वाक्संबद्धा। अन्यत्र, सायणाचार्यैः' सूर्यस्य दुहिता सोमं पुनाति इत्यत्र श्रद्धेति गृहीता, ब्राह्मणवाक्यात् 'श्रद्धा वै सूर्यस्य दुहिता, श्रद्धा हि एनं पुनाति, इत्यस्मात्। तैत्तिरीयब्राह्मणे, सावित्र्या निजप्रियकरात् सोमात् वेद उपलब्ध इति कथितम्। यद्यपि सावित्री च सवितुर्दुहिता तथापि च सा सूर्या, सूर्यस्य दुहितापि स्यात्। यतः सूर्याविवाहवर्णने सविता एव पिता एनां ददाति वरायेति वर्णितम्। 'सूर्यां यत् पत्ये

शसन्तीं मनसा सविता अदात्' इति। अत एव यथा गेल्डनरमहोदयैः प्रतिपादितं, तथा वेदे सूर्यस्य दुहिता वाक्संबद्धा च काव्यस्याधिष्ठात्री देवता चेति मे भाति। अपराप्येका देवता ऋग्वेदे वाक्संबद्धा दृश्यते। सा च सरस्वती। यद्यपि सा नदी इति सुपरिचिता, तथापि सा 'धीनामवित्री' इति वर्ण्यते। देवी इति च भवति संबुद्धिः। यथा षष्ठे मण्डले बार्हस्पत्य. भारद्वाजः कथयति। प्रथमे मण्डले (१.३.११) मधुच्छन्दोवैश्वामित्रः तां वर्णयति चोदयित्री 'सूनृतानां चेतन्ती सुमतीनाम्।' 'धियो विश्वा विराजति' (१.३ १२) इति। एषा सरस्वती वर्णेन शुभ्रेति दृश्यते, यतो वसिष्ठः सप्तमे मण्डले, (९-५६) 'वध शुभ्रे सरस्वती' ति भणति। अपरिहार्यो भवति संबन्धो धीनामवित्र्याः सूनृतानां चोदयित्र्याः सुमतीनां चेतन्त्याः सरस्वत्या सूर्यस्य दुहित्रा सह, याऽपि वाक्संबद्धा भवति। सरस्वत्या वसिष्ठोक्तं शुभ्रत्वं 'सर्वशुक्ला सरस्वती' इति समयं स्मारयति। उत्तरे युगे काव्यविद्या-देवतात्वेन गृहीता स्वीकृता सरस्वती, वैदिकसरस्वती सूर्यस्य दुहिता चेत्यनयोर्देवतयोः संमेलनेन संजातेति मे मतिः।

यथाऽहं पश्यामि, सूर्यस्य दुहितुः काव्यदेवताया अश्विनोश्च विवाहोऽर्थपूर्णो भवति। यतो मन्ये च, अत्र वैदिककविभिर्निर्मितमत्यन्तं रमणीयं रूपकम्। मनुर्वैवस्वतः कथयति 'विभिर्द्वा चरत एकया सह, प्रवासेव वसतः' इति अष्टमे मण्डले (८.२.९८) काव्यकल्पनाऽश्वारूढा वा सुपर्णारूढा प्रवासशीला च सततमिति एतदेव व्यज्यतेऽत्र। राजशेखरेण काव्यपुरुषो वर्णितः काव्यमीमांसायां, किन्तु वैदिक-कविभिर्यत् काव्यदेवताया विवाहवर्णनं कृतमुपलभ्यते, तदनुपमं नाम।

रैभ्यासीदनुदेयी नाराशंसी न्योचनी ।

सूर्याया भद्रमिद्वासो गाथयैति परिष्कृतम् ॥

चित्तिरा उपबर्हणं चक्षुरा अभ्यंजनम् ।

द्यौर्भूमिः कोश आसीत् यदयात् सूर्या पतिम् ।

स्तोमा आसन् प्रतिधयः कुरीरं छन्द ओपशः ।

सूर्याया अश्विना वराऽग्निरासीत् पुरोगवः ॥

सोमो वधूयुरभवदश्विनास्तामुभा वरा ।

सूर्यां यत् पत्येशंसन्तीं मनसा सवितादधात् ॥

मनो अस्या अन आसीद् द्यौरासीदुत च्छदिः ।

शुक्रावनड्वाहावास्तां यदयात् सूर्या गृहम् ।

ऋक्सामाभ्यामभिहितौ गावौ ते सामनावितः ।

श्रोत्रं ते चक्रे आस्तां दिवि पन्थाश्चराचरः ।

शुची ते चक्रे यात्या व्यानो अक्ष आहतः ।

अनो मनस्मयं सूर्याऽऽरोहत् प्रयती पतिम् ।

सूर्याया वहतुः प्रागात् । (१०.८५.६-१३)

अत्र काव्यविषयस्य, विचारस्य वा कवितायाश्च विवाहो मिलनं वर्ण्यते इति मे मतिः । पश्यन्त्वत्र भवन्तः । चित्तिर्विचार उपबर्हणमुपधानम् । चक्षुरभ्यंजनं मनोऽनः । द्यौर्भूमिः कोशः । श्रोत्रं चक्रे गावौ ऋक्सामाभ्यामभिहितौ शुक्रौ । रैभी, यज्ञीया कविताऽनुदेयी । नाराशंसी, स्तवन लौकिकन्याचनी, गृहं नेत्री । सूर्याया भद्रवासो गाथया लौकिककाव्येन परिष्कृतं शोभितम् । एवंविधश्छन्दो भूषणम् । पन्था दिवि । सचेतसां विस्मयावहः 'मनस्मयः' अनः प्रवर्तते । मन्ये राजशेखरेण नावलोकितं स्यादिदं सूर्याविवाहवर्णनं तस्या रथस्य च वर्णनम् । अन्यथा कविकुलगुरवे कालिदासाय 'शृंगारे ललितोद्गारे कालिदासो न जीयते' इतिप्राक्-सनातनजयपत्रदानात् तेन एकवारं विमर्शितं स्यात् । मन्येऽस्मिन् सकले वर्णने, ईदृशो कोमलता सूचकता च दृश्यते, ईदृशं माधुर्यं लालित्यं च दृश्यते, ईदृशं शृंगारश्च, यत् स्वयं भ्रमरपद-स्पर्शासहनपेलवशिरीषप्रियः कालिदासोऽप्यत्र मुग्धः स्यात् वदेच्च 'दूरीकृतोऽस्मि खल्वनेन कविना यतो मयाऽपि न कल्पित ईदृशो रथोऽम्बिकाया विवाहप्रसंगे न वा इन्दुमतीस्वयंवरप्रसंगे । यतो नाऽऽसन् प्राचीनाः परयशोऽसहमानाः परगुणविद्वेषिणो मात्सर्यान्धाश्च । अन्यच्च । सचेतसां हृदयंगमो ध्वनिरप्यत्र भवति येन मन्ये एतत्

सचेतस आनन्दवर्धनस्यापि आनन्दस्य वर्धनं स्यात्। वागर्थयोर्विवाहः पार्वतीपरमेश्वरविवाहसम एव। अतएव च आहानुपमोपमः कालिदासः रघुवंशे 'वागर्थाविव संपृक्तौ' इत्यादि। एतत् सुकुमारं रमणीयं चित्रमधिकतरं रमणीयं भवति यदा उषस उज्वलाः पवित्रा वर्णा अत्रोपयुज्यन्ते। यतः साऽपि वाक्संबद्धा। वसिष्ठः प्रत्यूषस्येव जगौ काव्यं, यतः कथयति सः सप्तमे मण्डले।

"एषस्य कारुर्जरते सूक्तैरग्रे बुधान उषसां सुमन्मा" (७.६८.९)

उषसामग्रे' स एवं रम्यो रम्यतरः कालो, यदा प्राणिनां चेतांसि, कामपि पवित्रां चेतनां भजन्ते, स्फूर्तिं लभन्ते, निखिलं विश्वमपूर्वेण चैतन्येन पूरित भवति, प्रकाशमयतामनुभवति। अत एव च कालिदासः 'पश्चिमयामिनीयामस्य महत्वं' पश्चिमाद् यामिनीयामात् प्रसादमिव चेतनेत्यत्र सूचयामास। 'उषाः सरस्वती सूर्यस्य दुहिते'ति देवतात्रयरूपेण मूर्तितां भेजे ऋग्वेदे कवीनां काव्याधिष्ठितदेवताकल्पना। पाश्चात्या अपि प्राचीना अपि काव्यदेवतामनेनैव प्रकारेण वर्णयामासुः। अतो मन्ये वैदिकैः कविभिर्निर्मितात्र काव्यदेवता याऽजरामृता सकलविश्वव्यापिनी सकलविश्वमोहिनी च क्वैषा वैदिककवीनां रुचिरा, सुकुमारा, काव्यदेवता सूर्यस्य दुहिता क्व च राजशेखरस्य काव्यपुरुष। मन्येऽस्याः सुकुमारकल्पनायाः सूर्यस्य दुहितुर्वा तस्या अनस्मयस्य अनक्षः वाधिक विश्लेषणं मृदुनि मृगशरीरे शरप्रक्षेपणं स्यात्, अपरंच, अधिकतरं स्वरूपतोत्यन्तविशदाया अस्याः

स्पष्टीकरणमपि श्रीखण्डलेपेन विधोः पाण्डुरीकरणमिव व्यर्थमनुचितं च स्यात्। दृष्ट्वा ह्येनां, प्रेरितानि वाऽनया वैदिककविमनांसि तरलीभवन्ति यथा सागरश्चन्द्रोदये।

यथा वत्सः कण्वः कथयति, प्रकृतेः सान्निध्ये विशेषतो नदीपर्वतानां सान्निध्ये कविमनांसि तरलीभवन्ति काव्यं च जायते, न क्रियते। स वदति,

'उपह्वरे गिरीणां संगथे च नदीनाम्। धिया विप्रो अजायत'
(८.६.२८) इति।

द्रष्टव्योऽवधानपूर्वकमयं शब्दप्रयोगः, 'धिया विप्रो अजायत' काव्यं न क्रियते जायते तु तद्, यतः स्फुरणं हि तत् प्रतिभायाः।

ईदृश्यासीद्दृष्टिर्वैदिककवीनां काव्यकलाविषयिका। दृश्यते च साम्यं विचारेषु, वैदिककवीनां प्राचीनयवनविचारवतां च प्लेटोअरिस्टाटलादीनाम्। यत उभयत्राप्ययमेव विचारोऽङ्गीकृतो दृश्यते, यद्यथा तक्षा रथं, तन्तुको वस्त्रं, चर्मकार उपानहादीनि करोति, तथैव कविरपि काव्यं करोति। विद्यते चात्र तन्तुकतक्षचर्मकारादीनां प्रवृत्तौ, कृतौ च प्रयोजनं, यदभिलक्ष्यैव भवति निर्मितं वस्त्रं रथं उपानदादीनि, तथापि कविप्रयोजने विद्यते। मनसि किंचिद् वर्तते, तदेव व्यापारेण साकारं क्रियते। यदि वर्तते व्यापारे कौशलं, तदा कृतिरपि रुचिरा भवति, अतः कला नाम 'कर्मसु कौशलम्'। अन्ये कलाविवेचकाः न तु एतन्मतमाद्रियन्ते, यथा कालिंगवुडमहोदयाः। ते भवन्ति सौन्दर्यवादिनः। काव्यस्य प्रयोजनमेकमेव, सौन्दर्यानुभूतिः। नान्यो विद्यते चात्र हेतुः प्रयोजनं वा। यदि विद्यते प्रयोजनं, न सा कला। सुचरितफलरूपाया नवनवोन्मेषशालिन्या यत् सहजं स्फुरणं, तदेव काव्यमिति एतेषां दृष्टिः।

प्रयोजनमनुद्दिश्य काव्यं च कुरुते कविः। फलं नाम रसानन्दो ब्रह्मास्वादाद-सहोदरः। उक्तं च मया, प्रथमं च जायते काव्यम्। ततश्च तस्य शास्त्रम्। साहित्यशास्त्रं नाम प्रथितयशःकवीनां वाग्वश्यानां काव्यस्य परिशीलनेन, उन्मीलितनयनानां विवेचकानां, काव्यगुणदोषचर्चा। कव्योऽपि यत्र कुत्रापि स्वीयामुपपत्ति सूचयन्ति। कदाचिद् भवन्त्यन्तर्मुखाः कवयः। कदचित् प्रशंसन्ति स्वीयं काव्यम्। ततश्चापि जायते काव्यशास्त्रं तेषाम्। वैदिककवयो नात्रापवादभूताः।

इष्टदेवतां वशीकर्तुमिच्छन्ति वैदिककवयः प्रार्थनया गिरा ब्रह्मणा। अतएव प्रशंसन्ति अहमहमिकया स्वकाव्यानि। प्रशंसन्ति च निजकर्मकौशलं, तज्जन्यफलं च। यथा गौरवीतिः शाक्त्यः वदति।

इन्द्र ब्रह्म क्रियमाणा जुषस्व

या ते शविष्ठ नव्या अकर्म।

वस्त्रेव भद्रा सुकृता वसूयू

रथं न धीरः स्वपा अतक्षम्॥

(ऋ० ५.२९.१५)

जानीते, अत्र शाक्त्यः यद् ब्रह्म क्रियमाणमस्ति, नव्यं भद्रं च। जानीतेऽपि स्वव्यापारमतएव वदति 'अतक्षम्' समर्थितोऽयमर्थो दृश्यतेऽत्रिभारद्वाजादिभिः। वसिष्ठस्तु यद्यपि ब्रह्मा 'क्रियमाणम्' इत्येव सूचयेति 'सुवृक्तिमिषं न कृण्वे असुराः नवीयः' (ऋ० ७.३६.२) इत्यत्र तथैव सः काव्यनिर्माणप्रसंगे स्वाभाविकतामपि दर्शयति। वदति सः

इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः ।

अभ्राद् वृष्टिरिवाजनि ॥

(ऋ० ७।९४।१

घनसदृशं हि कवेः मनः, वृष्टिसदृशं च काव्यम् । अर्थगर्भा चैषा वसिष्ठस्योपमा, यतो गाम्भीर्य सहजताऽपरिहार्यतेत्यादिगुणसमुदायः काव्यस्य अनया सूचितो भवति । ब्रह्म 'देवकृतं' भवतीत्यापि 'यो ब्रह्मणः देवकृतस्य राजा (ऋ० ७ ९७ ३) इत्यत्र दृश्यते । वैदिककवीनां श्लोकः दैव्यः भवति । वाक् काव्यमयी बृहस्पतिदत्ता भवतीति 'बृहस्पति-र्वाचमस्मा अयच्छत' इत्यत्र ध्वनितं भवति । काव्यं ब्रह्म वालंकारैः सुशोभितं क्रियते कविना इति ।

इमां ने वाचं···रथं न धीरः स्वपा अतक्षिषुः

···शुम्भन्तो जेन्यं यथा वाजेषु विप्र वाजिनम् ।

(ऋ० १।१३०।६)

अत्र यथाश्वोऽलंक्रियते तथैव काव्यमपीति व्यज्यते । सुवृक्तिः शब्दोऽपि वैदिककविभिः प्रयुक्तो ब्रह्मविषये इममेवार्थं दर्शयति । समीचीनमेव तद् यत् सायणाचार्याः 'सुवृक्ति' शब्दे सुसमाप्ति रित्यवधारयन्ति । अन्यत्र शोभनावर्जकं स्तोत्रमित्यप्यवधारयन्ति । यदुक्तंर्मम्मटादिभिः 'शिवेतरक्षतिः' इति काव्यप्रयोजने पठ्यते तदनेन प्रकारेण शोभनावर्जनादिनात्रापि दृश्यते । वैदिककवयो 'नव्यम्'

इति पदमपि वारंवारं ब्रह्मविषये प्रयुञ्जते, तदपि युक्तमेव मन्ये। नवीनत्वं नाम रमणीयतायाः रूपम्। विश्वामित्रोऽपि वर्णयति निज काव्यम्।

दिवश्चिदा पूर्व्या जायमाना
वि जागृविर्विदथे शस्यमाना।
भद्रा वस्त्राण्यर्जुना वसाना
सेयमस्मे सनजा पित्र्या धीः ।। इति

(ऋ० ३.३९.२)

यथा कश्चित् प्रियः प्रेयसीं कामयते, तथा देवा अपि कविकृत-कवितां कामयन्तामित्यपि प्रार्थना दृश्यते।

जोषयासे गिरश्च नः। वधूयुरिव योषणाम् ।।

(ऋ० ३.५२.३)

इत्यत्र। 'काव्यं देवहितं प्रियं हृद्यं सुशेव' मस्ति इत्यपि कथयन्त्यत्रिणः अर्कशब्दोऽपि ब्रह्म वाचकः काव्यवाचको ऽतएव कविरिन्द्रं प्रार्थयति 'त्वं कविं चोदयोऽर्कसातौ' इति भारद्वाजः। यथा नद्यः समुद्रं पतिं गच्छन्ति

तथैव काव्यान्येव विषयं देवं गच्छन्ति, अभिप्राप्नुवन्तीति कथयत्यन्यो भारद्वाजः ।

समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसं गिर आ विशन्ति ।

(ऋ० ६.३६.३)

काव्यानि प्रार्थना वा स्वभावत एव देवाभिमुखानि विषयाभिमुखानि भवन्तीति

अव त्वे इन्द्र प्रवतो नोर्मिर्गिरो ब्रह्माणि नियुतो धवन्ते ।

(ऋ० ६.४७.१४)

अत्र सूचितम् । काव्यनिर्माणसमये कथं कीदृक् वा भवति कविमनस्तदेकेन भारद्वाजकुलोत्पन्नेन सम्यग्वर्णितं भवति । तत्तु वर्णनमित्थं भवति । अत्र च सन्दर्भः । आयोजितायां काव्यनिर्माणप्रतियोगितायां तस्यां प्रविष्टः कश्चित् कविः छन्दःशब्दादीनामुपयोगे, स्मरणे च, आत्मानमसमर्थं पश्यन् विचिन्तयति ।

'नाहं तन्तुं न वि जानाम्योतुं न यं वयन्ति समरेऽतमानाः ।

कस्य स्वित् पुत्र इह वक्त्वानि परो वदात्यवरेण पित्रा ॥

स इत् तन्तुं स वि जानात्योतुं स वक्त्वान्यृतुथा वदाति ।

य ईं चिकेतदमृतस्य गोपा अवश्चरन् परो अन्येन पश्यन् ॥

(ऋ० ६।६।२,३)

अत्र तन्तु नाम छन्दांसि यथा सायणाचार्या श्रोतुः भवति शब्दः कविः, काव्यं कुर्वाणः, पितुः साहाय्यमपेक्षते, ततश्च अमृतस्य गोपं प्रार्थयति ततश्च जानाति—

ध्रुवं ज्योतिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वन्तः।
विश्वे देवाः समनसः सकेता एकं क्रतुमभि वि यन्ति साधु॥
वि मे कर्णा पतयतो वि चक्षुर्वी३दं ज्योतिर्हृदय आहितं यत्।
वि मे मनश्चरति दूरआधीः किं स्विद्वक्ष्यामि किमु नू मनिष्ये॥

(ऋ० ६।६।५,६)

ज्योतिस्तु कवेर्हृदये निहितम्, तस्य : दर्शनार्थं, साक्षात्कारार्थं सर्वाणीन्द्रियाणि, सह मनसा, अन्तः पश्यन्ति। या योगिनां भवति स्थितिः साक्षात्कारसमये, सैव कविभिरप्यनुभूयते काव्यनिर्मितिसमये। वसिष्ठाश्च ब्रह्म सुपूतमक्षरं देवानां वर्धनां नवानि, अरंकृतिरिति वर्णयन्ति। अन्यच्च। सर्वेषामपि वैदिककवीनां वसिष्ठाः सगर्वा दृश्यन्ते निजकाव्यनिर्माणकौशलेन, निर्मितकाव्यगुणोत्कटतया च। अतएव ते वदन्ति वयं 'ते वसिष्ठाः'

येषां ब्रह्माण्यसमानि विप्रा विष्वग्वियन्ति वनिनो न शाखाः॥

(ऋ० ७।४३।१)

आत्मनः काव्यविषये तेषामुक्तयो भवभूतिं स्मारयन्ति। अन्यत्र ते वदन्ति

सूर्यस्येव वक्षथो ज्योतिरेषां, समुद्रस्येव महिमा गभीरः।
वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः॥

(ऋ० ७।३३।८)

कण्वा अपि कथयन्ति ब्रह्म 'मधुमद् वचः' भवति 'वत्सो वां मधुमद्वचोऽशंसीत काव्यः कविः' (ऋ० ८।८।११) इत्यत्र। काव्यं च कविमनस्तः अपामूर्मिरिव बहिर्निर्गच्छतीत्यपि कण्वाः कथयन्ति, 'अपामूर्मिर्मदन्निव स्तोम इन्द्राजिरायते' (ऋ० ८।१४।१०) इत्यत्र। काव्यं तु भवति देवताया भूषणमिति 'अग्निं शुम्भामि मन्मभिः' इत्यनेन ध्वन्यते। काव्यानि विचारशीलैः निर्मितानि भवन्ति, भवन्ति च अद्भुतानि यतो वदति यथा कण्वः 'ब्रह्मा ... क्रियन्ते अनतिद्भुता या ते अमन्महि' इति।

बहुविधाश्च उक्तयो दृश्यन्ते सोममण्डले यत्र सोमस्य काव्यस्य च संबन्धः स्पष्टतया प्रतीतो भवति। 'प्रत्नं नि पाति काव्यम्' इत्यत्र सोम काव्यस्य रक्षिता भवति। वस्त्राणीव, काव्यानि सोमः परिदधाति, 'काव्या कविः नृम्णा वसानो' इत्यत्र सूच्यते। सोमत एव प्रभवति नूतनकाव्यानां सौन्दर्यं पुरातनानां काव्यानामिव। सोम एव मार्गदर्शकः कवीनां नूतनकाव्यनिर्माणविषये यतः सोम एवं प्रार्थितो भवति।

नू नव्यसे नवीयसे सूक्ताय साधया पथः प्रत्नवद्रोचया रुचः॥

(ऋ० ९.९.८)

इत्यत्र। सोमश्च भवति वाचो जन्तुः कवीनाम्। काव्यानि सोमं शिशुमिव लिहन्तीत्यपि कथ्यते 'शिशुं रिहन्ति मतय' इत्यत्र। शब्द-प्रभुत्वेन काव्य-निर्माणशक्त्या च कवित्वं सिद्धं भवति इत्यपि कविगीर्भिः, काव्येन कविरित्यत्र स्पष्टमेव कथितम्। अप्रभुः गर्तायां पतति, इत्येतदपि, सूचितं भवति। 'अव गर्ता अव पदाति अप्रभुः' इत्यत्र। काव्यैर्हृदयस्पर्शोऽभिमतः वैदिककवीनाम् यतो वदन्ति ते 'अयं स्तोमो अग्रियो हृदिस्पृगस्तु शंतमः' (ऋ० १.१६.७) इति। काव्यं तु हृदयतो जायते कवे रसिकस्य देवस्य च हृदये प्रवेशस्तस्येष्यते इत्यपि स्पष्टमेव वदन्ति एते कवयः। नोधा गौतमो वर्णयति 'काव्यं नव्यसी हृदा जायमाना' इति। हृदिस्पृशो मनसा जायमाना इत्यत्रापि दृश्यते एषा कल्पना। काव्ये च कवेर्मनः हृदयमिच्छा सर्वाण्यपि प्रतिष्ठितानि भवन्तीति 'इन्द्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियो मर्जयन्त' इत्यत्र व्यज्यते। कविः काव्यानि जनयति प्रेरयति वेति....'बर्हिरिव प्रवृञ्जे स्तोमान् इयर्म्यभ्रियेव वातः' इत्यत्र दृश्यते। काव्ये, निखिलं सौन्दर्यं शुचिता च विद्यते इति 'विश्वपेशसं शुचिपेशसं धियम्' इत्यत्र दृश्यते। सुकविः जानाति वाक्तत्त्वं, वृत्ततत्त्वं च इत्यपि दृश्यते 'कश्छन्दसां योगमा वेद धीरः को धिष्ण्यां प्रति वाचं पपाद (ऋ० १०.११४.९) इत्यत्र। वाक्तत्त्वं विजानत एवोत्कृष्टं फलं विद्यते, तदितरस्य श्रमोऽफलो भवतीति, बृहस्पतिरांगिरसः

'उतो त्वस्मै तन्वं१वि सस्रे जायेव पत्य उशती सुवासाः।

(ऋ० १०.७१.४)

अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम्॥

(ऋ० १०.७१.५)

इत्यत्र प्रतिपादयति। स एव कथयति, 'ये सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि।' भवभूत्यादयः कवयोऽपि, एतदनुसारिणः भवन्ति इति स्पष्टमेव दृश्यते। वागाम्भृणीये तु, वाचः यत् महत्त्वं कविना प्रतिपादितं दृश्यते अपूर्वं हि तत्। परतत्त्वस्पर्शे हि परतत्त्वविमर्शे हि वा, वाचः पर उत्कर्षो भवतीति भवत्येतेषां कवीनां मतिः। सरस्वत्याः काव्यस्य रसस्य च संबन्धोऽपि सूचितो भवति—

पावमानीर्यो अध्येत्यृषिभिः संभृतं रसम्।

तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम्॥

(ऋ० .६७.३२)

स्पष्टमेवात्र कथ्यते यदयं रसः, ऋषिभिः संभृतस्तस्याध्ययनं यः कुरुते, तस्मै क्षीरं सर्पिः मधूदकं भवति सरस्वती वा 'दुहे'। न कोऽप्यत्र सन्देहो यत् कविरत्र श्लेषमङ्गीकरोति। काव्याध्ययनेन, सरस्वती आराधिता भवति, वागुपासिता भवति, सन्तुष्टा च साधनं ददाति, विमलं फलमध्येतुः आराधकस्य वा भवति। अतएव चोत्तरकालिकेषु काव्यसाहित्यग्रन्थेषु काव्यं 'यशसेऽर्थकृते' इत्यादि पठित भवति।

उक्तं च मया परतत्त्वस्पर्शे हि काव्यस्य पर उत्कर्षः। अतएव वदन्ति कवयो वैदिकाः 'काव्यमृतस्य सदनात्' निर्गच्छति। वाक्साधनेन सत्यस्यैवाराधनं कर्तव्यं कविभिः। सार्थनामा पवित्र आंगिरसः कथयति।

ऋतस्य तन्तुर्विततः पवित्र आ जिह्वाया अग्रे वरुणस्य मायया ।

धीराश्चित् तत् समिनक्षन्त आशताऽत्रा कर्तमव पदात्यप्रभुः ।।

(ऋ० ९.७३.९)

अनेनैवात्रैवोक्तं च,

सहस्रधारे वितते पवित्र आ वाचं पुनन्ति कवयो मनीषिणः ।।

(ऋ० ९.७३.७)

इति स्पष्टमेतद् भवति। भवति च वैदिककवीनां श्रद्धा, यत् काव्यं परब्रह्मणि अक्षरे वा सुप्रतिष्ठितम् । एतत् परमं सत्यं गुह्यं यो न विजानाति, न स विजानाति काव्यमपि। व्यर्थ एव तस्य काव्यनिर्माणाध्ययनपरिश्रमः । वदन्ति वैदिकाः कवयः 'ऋचो अक्षरे परमे व्योमन्.... यस्तन्न वेद किमृचा करिष्यति' । छन्दसामपि भवति संबन्धोऽमृततत्त्वेन सह । अत्रापि वदन्ति ते ।

यद् गायत्रे अधि गायत्रमाहितं त्रैष्टुभात् वा त्रैष्टुभं निरतक्षत ।

यद्वा जगज्जगत्याहितं पदं य इत् तद् विदुस्ते अमृतत्वमानशुः ।।

(ऋ० १.१६४.२३)

वाक्छन्दोक्षरादीनामेतदेव महन्मंगलं प्रयोजनममृतस्पर्शरूपं भवति । अतएव वदति सः

गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ।।

(ऋ० १.१६४.२४)

पवित्रेण मनसा हि परं दृश्यते आत्मा वा । अत एवात्रापि कविर्वदति निजात्मानुभवविषये तं पाकेन मनसाऽपश्यम् । परंच एकमेव विद्यते तथापि कविभिरेव तद् वहुधा कृतं भवति । कथयति कविः

सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं वहुधा कल्पयन्ति ।

(ऋ० १०.११४ ५)

यथा च एभिर्विप्रैः कविभिर्वचोभिस्तदेकं बहुधा कल्पितं तथा साक्षात्कृतं यतो वैरूपः सध्रिः कथयति

एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे ।
तं पाकेन मनसापश्यमन्तितस्तं माता रेꣳह स उ रेꣳह मातरम् ।।

तत्सर्वं श्वो द्रक्ष्यामः। तमेव विषयमधिकृत्य तृतीयं व्याख्यानं भविष्यति। अतः

कविकुले ऋषिभिः सुनिर्मिता शुचि-भद्रा शुभ्रा च पावका।

मम दधातु हृदये सा देवी स्थिरपदं विलसत् सरस्वती॥

इति संप्रार्थ्य विरम्यतेऽधुना।

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विद्यापीठम्

शारद-ज्ञानमहोत्सवे

तृतीयं व्याख्यानम्

२३ - ३ - १९६९

वैदिककवीनां काव्यविषयविचारः

अनन्याधीन-कल्याणान् भक्तकल्याणवर्षकान् ।
योगीन्द्रान् सद्गुरून् वन्दे श्रीनृसिंहसरस्वतीन् ।।

उक्तं च भगवता यास्केन 'साक्षात्कृतधर्माण: ऋषय आसन्' । सर्वथाऽवितथमेव तत् । मन्येऽयमेव ऋषीणां साक्षात्कारः परतत्त्वस्य, 'ऋषिर्दर्शनात्' इत्यस्मिन् निर्वचने सूचितो भवति । प्रथमे व्याख्याने मयेदं निर्वचने न स्वीकृतमासीत्, किन्त्वत्र अद्य स्वीक्रियते । नायं विसंवादो यन्मया तदोक्तं न तद्विरोधि किंचिदत्र प्रतिपाद्यते । यत ऋषीणां 'दर्शनमासीत्' तदासीत् परतत्त्वस्य सत्यस्य न मन्त्राणाम् । 'दर्शनादृषिः' इत्यत्र, परतत्त्वदर्शनमभिप्रेयते । परतत्त्वदर्शनं नाम, अविनाशिपरमसत्यस्य साक्षात्कारः । निखिलविश्वस्य यत् सत्यात्मकं प्रथमकारणं तस्य ज्ञानम् । ऋषिशब्देन वैदिककवीनां यथा साक्षात्कारः सूच्यते, तथा तेषां ज्ञानातिशयोऽपि सूच्यते । भवति च शतपथ-ब्राह्मणे निर्वचनमृषिशब्दस्येदृशम् ।

'के ते ऋषयः..............श्रमेण तासां अरिषन् तस्माद् ऋषयः' इति ।

रिष्धातुर्भवति ज्ञानकर्मा । यद्येते त्रयो धातवः-रिष्, दृश्, स्मृ, विमृश्यन्ते, तदा दृश्यत एषां साधारणीभूतस्य 'ऋज्ञानकर्मणः धातोः, पृष्ठभूमित्वम् । भवन्ति ज्ञानस्य भिन्ना अवस्था या धातुत्रयेण सूच्यन्ते । ऋष् इत्यनेन, प्रथमकारणज्ञानं सूच्यते, दृश् इत्यनेनान्तर्निहितस्य भूत-कालिकं ज्ञानं सूच्यते । 'स्मृ' इत्यनेन, गतस्य पुनर्ज्ञानं सूचितं भवति । स्मृ इत्यस्मिन् 'स्म' इति भूतकालवाचकः । अतएव ऋषिशब्दो जगतः

उषसः सौन्दर्यं, 'उन्मादयितृ' सौन्दर्यं कविरित्थं वर्णयति ।

कन्येव तन्वा३शाशदानाँ एषि देवि देवमियक्षमाणम् ।

संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती ॥

सुसंकाशा मातृमृष्टेव योषाविस्तन्वं कृणुषे दृशे कम् ।

भद्रा त्वमुषो वितरं व्युच्छ न तत् ते अन्या उषसो नशन्त ॥

(१.१२३.१०-११)

सत्यमनुपममेवेदं काव्यम् । कथं नाम विवेचनं कर्तुं पार्यतेऽतिरम्यकल्पनायाः, 'मातृमृष्टेव योषा' इत्यत्रोक्तायाः । वैदिककालिदासोऽयमिति मे भाति तथाप्ययं कविर्जानात्येव यदुषसः 'परा च यन्ति पुनरा च यन्ति ।' ताः पश्यन्नेव मानवस्तु वृद्धो भवति, अवशः प्रतिदिनं मृत्योः समीपं नीयते । अतएव विषण्णेन चेतसा स वदति ।

पुनः पुनर्जायमाना पुराणी समानं वर्णमभि शुम्भमाना ।

श्वघ्नीव कृत्नुर्विज आमिनाना मर्तस्य देवी जरयन्त्यायुः ॥

(१.९२.१०)

'दैव्यानि व्रतानि आमिनती' सा स्वयं शुम्भमाना, अतिशोभना, सुरम्यवर्णा मर्तस्यायुर्जरयन्ती। अयं विचार एव तत्त्वज्ञाननिदर्शकः। अत एवोक्तं मया यत् सौन्दर्यदर्शनेन कविरन्तर्मुखो भवति। जीवन-विषयकं गम्भीरं चिन्तनं करोति। परतत्त्वे च दत्तदृष्टिर्भवति। यतः सौन्दर्यदर्शनेनापि सत्यस्य, परतत्त्वस्य भवति साक्षात्कारः। अयं विश्वामित्रः पृथिव्याः सौन्दर्यं वर्णयतीत्थम्।

पथ्या वस्ते पुरुरूपा वपूंष्यूर्ध्वा तस्थौ त्र्यविं रेरिहाणा,

ऋतस्य सद्म वि चरामि विद्वान् महद् देवानामसुरत्वमेकम्।

(३.५५.१४)

पृथिवी तावदत्र भवति वर्णिता 'पुरुरूपा वपूंषि' इति। केन शक्यं वर्णनं मातुर्वसुन्धरायास्तारिण्या धारिण्याः समीरणशीतलायाः सस्य-श्यामलायास्तथापि तस्याः सौन्दर्यस्यापि दर्शनेन प्रमुदितोऽयं कविः 'ऋतस्य सद्म विचरामि विद्वान्' इति वदति, कथयति च पुनः 'महद्दे-वानामसुरत्वमेकम्'।

न केवलमेभिः कविभिरुषसः, पर्जन्यस्य वा, पृथिव्या वा सौन्दर्यं दृष्टं ततश्च ऋतं ततश्च देवानां महदसुरत्वं सूक्ष्मतरं केवलं मनसो गोचरं वाक्सौन्दर्यमप्यनुभूतम्। दृश्यतां तावद् यद् वदति बृहस्पतिरा-ङ्गिरसो वाचो विषय।

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।

अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ।।

उत त्वः पश्यन् न ददर्श वाचमुत त्वः शृण्वन् न शृणोत्येनाम् ।

उतो त्वस्मै तन्वं१वि सस्रे जायेव पत्य उशती सुवासाः ।।

(१०.७१.२,४)

वाक्सौन्दर्यं नन्विन्द्रियगम्यमिवात्राभाति कविता 'भद्रा लक्ष्मीः' दृष्टा तथा च सा जायेवापि दृष्टा ।

विचारसौन्दर्यमप्येभिर्दृष्टमनुभूतमासीत् । गयः प्लातः कथयति स्वविचारविषये ।

क्रतूयन्ति क्रतवो हृत्सु धीतयो वेनन्ति वेनाः पतयन्त्या दिशः ।

न मर्डिता विद्यते अन्य एभ्यो देवेषु मे अधि कामा अयंसत ।।

(१०.६४.२)

गयप्लातस्य विचाराः सर्वत्र गच्छन्ति 'पतयन्त्यादिशः' अन्ते च देवेषु ते प्रतिष्ठिता आश्रिता भवन्ति। मन्ये एभिरुदाहरणैः समर्थितं सम्यक् भवेद् यन्मयोक्तं वैदिककवीनां संजायते गूढस्य शिवस्य देवस्य वा ऋतस्य दर्शनं सौन्दर्यदर्शनेन। सौन्दर्यसाक्षात्कार एवास्य साक्षात्कारस्य वर्णनमुचितं भवेत्।

यज्ञचिन्तनद्वारेष्वपि भवति वैदिककवीनां परतत्त्वसाक्षात्कारः। सोमसूक्तेषु एतद् दृश्यते स्पष्टतया। अन्यत्रापि पौनःपुन्येन कथयन्ति कवयो यद्यज्ञस्य भवति सम्बन्ध ऋतेन सह। तथापि विवेचनसौकर्यार्थमिदं दैवोदासिप्रतर्दनस्यात्र सोमविषयकं काव्यमुदाहरामि। सोमस्तु तावद्भवति आर्याणामुत्साहवर्धकमिन्द्रस्यापि शक्तिवर्धनं पेयम्। तथापि प्रतर्दनो वदतीत्थम्।

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः।

जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः।

(ऋ० ९.९६.५)

तस्य कवेः पुरत एव सोमः 'पवते' तथापि पवमानं सोमं दृष्ट्वा, प्रतीतिर्जायते तस्य स देवानामपि जनितेति। अतएव कविस्तं स्तौति—

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम्।

श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥

(ऋ० ९.९६.६)

ऋषिमना य ऋषिकृत् स्वर्षाः सहस्रणीथः पदवीः कवीनाम् ।

तृतीयं धाम महिषः सिषासन् त्सोमो विराजमनु राजति ष्टुप् ॥

(ऋ० ९-९६-१८)

सोमस्य विभूतियोग इति वर्णनं मया क्रियते । द्रष्टव्याच शब्द-संहतिर्ऋषिमना ऋषिकृत्या स्तोत्राणि स्मारयति । अस्मिन् सुदीर्घे सूक्ते कविः सौन्दर्यं सोमस्य बहुविधाभिः उपमाभिः वर्णयति । पश्चाच्च तत्रायं विभूतियोगोऽपि दृश्यते । अन्यत्रायं सोम एवं प्रस्तूयते कविना ।

यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितम् ।

तस्मिन् मां धेहि पवमानाऽमृते लोके अक्षित इन्द्रायेन्दो परिस्रव ॥

यत्र राजा वैवस्वतो यत्रावरोधनं दिवः ।

यत्रामूर्यह्वतीरापस्तत्र मामसृतं कृधीन्द्रायेन्दो परिस्रव ॥

यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः ।

लोका यत्र ज्योतिष्मन्तस्तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव ।।

यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपम् ।

स्वधा च यत्र तृप्तिश्च तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव ।।

यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।

कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव ।।

(ऋ० ९.११३.७-११)

सोमसवने मग्नोऽयं कश्यपो मारीचोऽमृतत्वं वांछति । नास्य कामा हृदि श्रिताः । अतएव यद्यपि यज्ञकर्मणि, मग्ना भवन्ति एते कवयस्तथापि यज्ञकृत्यद्वारेणाप्यमृतत्वमाप्तुमिच्छन्त्येव । तदा सोमो न दृश्यते एभिः सोमवल्लीत्वेन किन्तु स भवति जनिता विश्वस्यात एवामृतत्वस्य दाता । अयं साक्षात्कारो यागीयसाक्षात्कार इति वक्तुं शक्यते ।

प्रकृतेः सान्निध्येऽपि भवति एषामीदृश एव परतत्त्वसाक्षात्कारः, परतत्त्वसंस्पर्शो वा । पश्यन्त्वत्रभवन्तः । मेधातिथिः काण्वो विश्वभैषजीः आप उद्दिश्य वदति ।

अपो देवीरुप ह्वये यत्र गावः पिबन्ति नः सिन्धुभ्यः कर्त्वं हविः ॥

अप्स्व१न्तरमृतमप्सु भेषजमपामुत प्रशस्तये देवा भवत वाजिनः ॥

(ऋ० १.२३ १८.१९)

पश्यदापोऽपि पश्यति ताः 'देवी' स्वरूपेण, ततश्च तत्र विद्यमानम-मृतत्वमपि पश्यति । अतएव ताः प्रार्थयति ।

इदमापः प्रवहत यत् किं च दुरितं मयि ।

यद् वाहमभिदुद्रोह यद् वा शेप उतानृतम् ।

(ऋ० १.२३.२२)

या प्रायेणांग्लकवेवर्ड्स्वर्थनाम्नो वृत्तिर्दृश्यते निसर्गस्य प्रकृतेर्वा सान्निध्ये, सैवात्रापि प्रकर्षेण दृश्यते, इति मे मतिः। पश्यतायं गृत्समदो, वैद्युतं प्रकाशं वर्णयति ।

हिरण्यरूपः स हिरण्यसंदृगपां नपात् सेदु हिरण्यवर्णः ।

हिरण्ययात् परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥

(ऋ० २.३५.१०)

तथापि हिरण्यवर्णं वर्णयतोऽस्य जायत एव प्रतीतिः'विश्वं तद् भद्रं यद् अवन्ति देवाः' ।

कौशिकः सौभरः 'रात्रि' मित्थं वर्णयति ।

रात्री व्यख्यदायती पुरुत्रा देव्य१क्षभिः ।
विश्वा अधि श्रियोऽधित ।।
ओर्वप्रा अमर्त्या निवतो देव्यु१द्वतः ।
ज्योतिषा बाधते तमः ।।
निग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः ।
नि श्येनासश्चिदर्थिनः ।।

(ऋ० १०.१२७.१-२,५)

अपरोऽयमांग्लकविः यीटस् इति मन्ये । देव्या रात्र्याः सौन्दर्याभिभूतो यः कविस्तस्याः सर्वव्यापित्वं 'ऊरु अप्राः निवतः उद्वतः' इत्यत्र कथयित्वा पश्चात् वदत्युषसम्—

उप मा पेपिशत् तमः कृष्णं व्यक्तमस्थित ।
उष ऋणेव यातय ।

(ऋ० १०.१२७.७)

अपो देवीरुप ह्वये यत्र गावः पिबन्ति नः सिन्धुभ्यः कर्त्वं हविः ।।

अप्स्व १न्तरमृतमप्सु भेषजमपामुत प्रशस्तये देवा भवत वाजिनः ।।

(ऋ० १.२३ १८.१९)

पश्यदापोऽपि पश्यति ताः 'देवी' स्वरूपेण, ततश्च तत्र विद्यमानममृतत्वमपि पश्यति । अतएव ताः प्रार्थयति ।

इदमापः प्रवहत यत् किं च दुरितं मयि ।

यद् वाहमभिदुद्रोह यद् वा शेप उतानृतम् ।

(ऋ० १.२३.२२)

या प्रायेणांग्लकवेवर्ड्स्वर्थनाम्नो वृत्तिर्दृश्यते निसर्गस्य प्रकृतेर्वा सान्निध्ये, सैवात्रापि प्रकर्षेण दृश्यते, इति मे मतिः। पश्यतायं गृत्समदो, वैद्युतं प्रकाशं वर्णयति ।

हिरण्यरूपः स हिरण्यसंदृगपां नपात् सेदु हिरण्यवर्णः ।

हिरण्ययात् परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ।।

(ऋ० २.३५.१०)

तथापि हिरण्यवर्णं वर्णयतोऽस्य जायत एव प्रतीतिः'विश्वं तद् भद्रं यद् अवन्ति देवाः' ।

कौशिकः सौभरः 'रात्रि' मित्थं वर्णयति ।

रात्री व्यख्यदायती पुरुत्रा देव्य१क्षभिः ।
विश्वा अधि श्रियोऽधित ॥
ओर्वप्रा अमर्त्या निवतो देव्यु१द्वतः ।
ज्योतिषा बाधते तमः ॥
निग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः ।
नि श्येनासश्चिदर्थिनः ॥

(ऋ० १०.१२७.१-२,५)

अपरोऽप्यमांग्लकविः यीटस् इति मन्ये । देव्या रात्र्याः सौन्दर्याभिभूतो यः कविस्तस्याः सर्वव्यापित्वं 'ऊरु अप्राः निवतः उद्वतः' इत्यत्र कथयित्वा पश्चात् वदत्युषसम्—

उपमा पेपिशत् तमः कृष्णं व्यक्तमस्थित ।
उष ऋणेव यातय ।

(ऋ० १०.१२७.७)

रसिकैरत्रभवद्भिः द्रष्टव्या चिन्तनीया चाभ्यर्थना—'उष ऋएाव यातय'। प्रकृतेः सान्निध्ये सौन्दर्यशान्तिभव्यतामिभूतानामेषां कवीनां हृदये परमं पावित्र्यं प्रविष्टमिव दृश्यते। एष भौमोऽत्रिः पर्जन्यं वर्णयति।

वि वृक्षान् हन्त्युत हन्ति रक्षसो विश्वं बिभाय भुवनं महावधात्।

उतानागा ईषते वृष्ण्यावतो यत् पर्जन्यः स्तनयन् हन्ति दुष्कृतः।

(ऋ० ५.८३.२)

यत् पर्जन्यः स्तनयन् हन्ति दुष्कृतः।

प्रतीदं विश्वं मोदते यत् किं च पृथिव्यामधि॥

पर्जन्ये वृष्टे सति, जायमानं 'महावधं' दृष्ट्वापि, जानात्येवायं कविस्तस्य नूतनविश्वप्रजननसामर्थ्यम्। अतएव स कथयति।

प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते स्वः।

इरा विश्वस्मै भुवनाय जायते यत् पर्जन्यः पृथिवीं रेतसावति॥

(ऋ० ५.८३.४)

विनाशहेतुरपि जननसमर्थोऽयं पर्जन्यो नाम। आंग्लकविनापि तदुक्तं 'पश्चिमवातं प्रति'।

तस्य स्मरणमत्रापरिहार्यमेव मन्ये। देवमुनिकृतम् अरण्यानी-सूक्तम् (१०.१४६) अत्रोल्लेखनीयं भवति।

भवेत् केषांचिन्मतिरत्र, यदत्र 'प्रकृति-काव्ये' न दृश्यते तादृशं तत्त्वज्ञानम् । किमर्थं नामायं प्रपंचः । ब्रूयुश्च केचन केवलमिन्द्रियगम्या सौन्दर्यप्रतीतिरेवात्र दृश्यते इति तान् प्रति ब्रूमः । प्रकृतिकाव्ये, सौन्दर्यदर्शनजन्य आनन्दो नाम प्रथमावस्था । तत एव जायते तत्र वर्तमानस्य गूढतत्त्वस्य, प्रकृतौ विद्यमानस्य प्रतीतिः । स एव साक्षात्कारः । प्रकृतिदर्शनं पावित्र्यं जनयति ततः पार्श्वे वर्तमानं यदक्षरं 'यस्य प्रशासने' सर्वं विश्वं प्राच्यः स्यन्दमाना नद्यः सूर्याचन्द्रमसावित्यादयः प्रवर्तन्ते तस्याधिगमो भवति । अयं साक्षात्कारः प्रकृतिसाक्षात्कार इति वर्णयामि ।

तत्त्वज्ञानविचारस्तु साक्षात्कारजनको भवत्येव । न तस्मिन् सन्देहस्यावकाशः । एतत्त्वत्रापि दृश्यते । तत्त्वज्ञानं तु भवति प्राधान्येन बुद्धिकार्यं बुद्धिप्रधानं च । साक्षात्कारस्तु भवति प्राधान्येन भावनोत्कर्षः । परां कोटिं गते हि चिन्तने चिन्तितं समुपतिष्ठते चिन्तकम् । श्रवणमनननिदिध्यासनादीनि च साक्षात्कारसाधनीभूतान्येव । अतएव साधकस्य तान्युपदिष्टानि । यद्यपि तत्त्वज्ञानविचारो बुद्धिप्रधानः प्राधान्येन , तथापि यथाहं पश्यामि, श्रवणमननचिन्तनादीनि भवन्ति तस्य प्रथमव्यापारात्मकानि । ततश्च यदा बुद्धिरपि 'बुद्धेः परं' वर्तमानं तं पश्यति तदा भवति साक्षात्कारो ज्ञानयोगिनाम् ! केचित्तु मन्यन्ते बुद्धेः प्रकर्षस्य साक्षात्कारस्य च भवति अन्तर्विरोधः । अतो दृश्यते साक्षात्कारे आदरः परतत्त्वादिषु, विचारश्च साक्षात्कारमारुरुक्षुः । विश्लेषणरता बुद्धिर्हृदयमपि न बहु मन्यते । साक्षात्कारश्च संभवति, परं ज्योतिर्दृष्टं भवति प्रायेण कविभिः कलाविद्भिर्ऋषिभिः । भवति चैतद् भाग्यं प्रतिभावतामनुग्रहवतां, येषां संजायते ज्ञानं स्फूर्तितः । साक्षात्कारो न प्रत्यक्षजन्यो न वेन्द्रियगम्यः । प्रकारेणा-

साधारणेन वैद्युतः प्रकाश इव, कुतश्चिदिवावतरति चेतसि, तद्दर्शनं प्रकाशो वा यस्मिन् 'परतत्त्वं' दृष्टमिव भवति। विशेषरूपोऽयमनुभवः, न च सर्वेषां भवति। 'अतएवोक्तं यमेवैष वृणुते तेन लभ्यः।' तत् 'परं' न भासयते बुद्धिरिति नैतत् सम्यक्प्रतिभाति मे। इतो दृश्यते साक्षात्कारस्तेषामपि, यैः केवलं बुद्धेरेव प्रामाण्यं स्वीकृतम्। सूक्ष्मं विचार्यमाणे सति, न दृश्यते अन्तर्विरोधो बुद्धेः साक्षात्कारस्य च, यतो येषां साक्षात्कारो भवति तेऽपि यद् 'दृष्टं भवति' तस्या बुद्ध्या अवगाहनमिच्छन्त्येव। न यत् सर्वं स्फूर्तिजन्यं तस्य प्रामाण्यं, विना विमर्शं तेऽपि स्वीकुर्वन्ति। अन्यच्च। ये न भवन्ति बुद्धौ आश्रिताः स्थिराश्च तेऽप्यवगच्छन्ति प्रामाण्यं स्फूर्तिदृष्टस्य। अतएव, मन्ये ज्ञानयोगिनामपि भवति साक्षात्कारः। ये हि प्राधान्येन भवन्ति तत्त्वचिन्तकास्तेषामपि तत्त्वचिन्तनादेव भवति साक्षात्कारः। न च बुद्धिश्रद्धयोरात्यन्तिको विरोधः। बुद्धिः श्रद्धां चक्षुष्मतीं करोति, श्रद्धा च बुद्धेर्भ्रमणशीलाया विश्लेषणपरायाः स्थैर्यं जनयति। दृश्यते च एषापि प्रवृत्तिः वैदिककविषु।

तत्त्वज्ञानं तेषामेव जायते, येषां चित्ते उत्पद्यन्ते संशयाः। न संशयात्मा विनश्यति किन्तु वक्तुं शक्यते, स एव सम्यक् पश्यति। संशयादेव प्रादुर्भवति जिज्ञासा, ततश्चोद्भवन्ति प्रश्नाः, ततस्तेषामुत्तरनिर्णयार्थमन्वेषणमन्वेषणं च तत्त्वज्ञानं नाम। ऋग्वेदकालो दैवतदृष्ट्या इन्द्रकाल इति वर्ण्यते, यत इन्द्रस्यैव प्राधान्यं सर्वत्र दृश्यते। तथापि दृश्यते कविचेतसि, इन्द्रस्याप्यस्तित्वविषये शंका। पश्यन्त्वत्रभवन्तो यन् नेमो भार्गवो वदति।

'प्र सु स्तोमं भरत वाजयन्त इन्द्राय सत्यं यदि सत्यमस्ति।'

नेन्द्रो अस्तीति नेम उ त्व आह क ईं ददर्श कमभि ष्टवाम ॥

(ऋ० ८.१००.३)

दृष्ट्वा निजभक्तं स्वास्तित्वविषये एव शंकाकुलमिन्द्रस्तस्मै दर्शनं ददाति वदति च ।

अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि मह्ना ।

ऋतस्य मा प्रदिशो वर्धयन्त्यादर्दिरो भुवना दर्दरीमि ॥

(८.१००.४)

अयमेवेन्द्र-साक्षात्कारः कवेर्नेमस्य । यदेन्द्रस्यास्तित्वे एव शंका कवेः संजाता तदा स्वाभाविकमेव तद् यद् दृश्यतेऽन्यदेवानामप्यस्तित्वे शंका कवीनाम् । अतएव ते पृच्छन्ति । 'कस्मै देवाय हविषा विधेम' इति । अनेन प्रकारेण जगतः मूलकारणस्यान्वेषणं क्रियते कविभिः । अतएवोपलभ्यन्ते वेदे हिरण्यगर्भनासदीयपुरुषसूक्तादीनि यत्र सृष्टि-विषयकं चिन्तनं दृश्यते । यथा देवानामस्तित्वविषये शंका समुत्पन्ना, तथैव तेषां सामर्थ्यज्ञानादीनां विषयेऽपि शंका समुदिता । ते देवा अध्यक्षस्य प्रशासने वर्तन्ते, कार्यं कुर्वन्तीति प्रतीतिः संजायते । अतएव सृष्टिकारणत्वेन नात्र देवाः किंतु किंचित् श्रेष्ठतरं तत्त्वं स्वीक्रियते देवैर्विनिर्मिता सृष्टिरित्येष पक्षः श्रद्धायुक्तैरेव स्वीक्रियते, विचारप्रधानानां तु भवति विमर्शः 'नासदासीन् नो सदासीत्' इत्यादिः । श्रद्धायुक्तैस्तु प्रजापतिर्विश्वकर्मेत्यादयः सृष्टिकारणत्वेन

स्वीक्रियन्ते। एवं वक्तुं शक्यते यतो दृश्यन्ते वैदिककवय आत्मतत्त्वविचिन्तका ये आत्मसाक्षात्कारार्थं यतन्ते। उपनिषत्कालप्रारम्भोऽत्रैव दृश्यते। दीर्घतमा औचथ्यः वदति।

को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्था बिभर्ति।

(ऋ० १.१६४.४)

तथैव च

पाकः पृच्छामि मनसाऽविजानन् देवानामेना निहिता पदानि।

(ऋ० १.६४.५)

अन्धोऽयं कविस्तथापि 'ऋषिः' यतो विद्यते तस्य दर्शनम्, नाम साक्षात्कारः। अनेनात्मतत्त्वं दृष्टं वर्तते यतः स कथयति।

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम्।

(ऋ० १.१५४.३१)

तत्त्वान्वेषणपरोऽयं वदति अस्मिन्नेव सूक्ते —

न वि जानामि यदि वेदमस्मि निण्यः संनद्धो मनसा चरामि।

(१.१६४.३७)

न केवलं वर्तते देवविषयिका शंका, किन्तु स्वात्मविषयिकापि शंका अनेनात्र प्रकटीकृता। अन्यच्चानेन ज्ञातं दृश्यते महद्रहस्यं जीवन-विषयकं सृष्टिविषयकं च। स कथयति जीवविचारे।

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते।'

सृष्टिविचारे कथयति सः

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।

एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।' इति।

(ऋ० १.१६४.४६)

ननु भवति महदाश्चर्यं, यदन्धेन कविना 'पाकेन मनसा' एतत् सर्वं 'दृष्टं' स्पष्टतया कथितं च।

याऽत्र एकत्वस्यानुभूतिर्दृश्यते, सैव तत्त्वज्ञानविचारस्य साक्षात्कारस्य ज्ञानस्य वा परा काष्ठा, परा गतिः। अनुभवावसानं ब्रह्मज्ञानमुच्यते। स चैकत्वानुभव एतेषां दृश्यते। वदति च वामदेवोऽपि, आत्मनः सर्वव्यापित्वमनादित्वं च विजानन्।

अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः।

अहं कुत्समार्जुनेयं न्यृञ्जेऽहं कविरुशना पश्यता मा'।।

अहं भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्यायाहमपो अनयं

वावशाना मम देवासो अनु केतमायन्।।'

(ऋ० ४.२६ १,२)

तत्त्वज्ञाने कवीनां विचारविकासोऽत्र दृश्यमानः, तेषां साक्षात्कार-प्रकर्षश्च नूनं विस्मयावहः। अनेकदेवेषु सृष्टिकारणत्वेन गृहीतेषु पूर्वजैरधुना वामदेवो धृष्टो वदति निजप्रत्ययं 'मम देवासः अनु केतमायन्।' अन्धो दीर्घतमा अप्येकत्वमनुपश्यति। एतदेव 'वेदान्त-दर्शनम्'। अयं साक्षात्कारस्तत्त्वज्ञानसाक्षात्कार इति वक्तुं शक्यते।

भक्तिसाक्षात्कारोऽपि वेदे दृश्यते। वसिष्ठो वरुणस्य भक्तो अतएव तेनानुभूतो वरुणस्यानुग्रहः। वरुणेन सह, तेन यदनुभूतं 'सुखं' तद् वर्णयति वसिष्ठः, तं च वरुणं ब्रूते।

'आ यद् रुहाव वरुणश्च नावं प्र यत् समुद्रमीरयाव मध्यम्।

अधि यदपां स्नुभिश्चराव प्र प्रेङ्ख ईङ्खयावहे शुभे कम्।।

क्व१ त्यानि नौ सख्या बभूवुः सचावहे यदवृकं पुरा चित्।

वृहन्तं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते ॥

(ऋ० ७.८८.३,५)

वसिष्ठेन वरुणेन सह नौकारोहणमनुभूतं, तेन वरुणस्य सहस्रद्वारं गृहमपि दृष्टम्। भवन्ति च एतेऽनुभवा अतीन्द्रियाः अतएव साक्षात्काराः। वरुणमुद्दिश्य यानि रचितानि सूक्तानि वसिष्ठेन, तेषु सर्वेषु दृश्यते उत्कटा भक्तिर्वसिष्ठस्य। स्थापितं च भाण्डारकर-महोदयैर्यद् वेदे भक्तिर्दृढमूला दृश्यते। अत्र च दृश्यते 'सख्य'-कल्पना। अत्र च दृश्यन्ते दैवतेन सह कृताः क्रीडादयः। अत्र च दृश्यते सा चेतसोऽवस्था, यस्यां दैवतविषयकं प्रेम अपि दृश्यते। अतएव न तच्चित्रं यद् भक्तिजनितसाक्षात्कारोऽप्यत्र दृश्यते।

साक्षात्कारविषये वैदिककवयः सूर्यं पौनःपुन्येन चिन्तयन्ति। सूर्यमेव 'सुपर्णः' 'वृषभः' इत्यादिप्रतीकैर्वर्णयन्ति। सूर्यस्य सवितुर्महत्त्वमनन्यसाधारणं वेदे। अतएव परमं महत्त्वं सावित्रीमन्त्रस्य। उपनिषत्स्वपि दृश्यते महत्त्वमादित्यस्यात एव आदित्यचिन्तने ते परतत्त्वं साक्षात्कुर्वन्ति। आदित्यसाक्षात्कारोऽयमिति वक्तुं शक्यते।

वैदिकाः कवयः सौन्दर्यरसिकाः प्रकृतिप्रेमिणो यज्ञरतास्तत्त्वविचिन्तका आसन्। संवेदनाक्षमत्वाच्चेतसः, प्रतिमाबलात्तैर्दृष्टं परतत्त्वम्। साक्षात्कृतं परतत्त्वमत एव ते 'साक्षात्कृतधर्माणः।' प्रपंचेन खलु विवेचनार्होऽयं विषयः। ऋतसत्यसदादीनामपि विचारोऽत्र कर्तव्यो भवति। तथाप्यत्र दिङ्मात्रं दर्शितम्। काव्यमुत्कृष्टं तदैव जायते यदा कवयो न केवलं पदलालित्ये बद्धादरा भवन्ति, किन्तु विश्वं मानवः परतत्त्वमित्यादीनां परामर्श रता भवन्ति। नहि ज्ञानेन

सदृशं पवित्रमिह विद्यते' यतः ज्ञानादेव मोक्षोऽमृतत्वं च। न च परतत्त्वसाक्षात्कारो ज्ञानवतामपि सुलभः। तथापि, कं न विलोभयन्ति दीर्घतमसो वचांसि '**द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम्**।' अतोऽपि विशालानुभूतिः का स्याद् मानवस्य। अन्तरिता वयं परतत्त्वतः। अतो न विद्यतेऽस्मादृशानां तद्विषयकः साक्षात्कारः। अतएव कथयति कविर्विश्वकर्मा भौवनः।

न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव।

नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति।

(ऋ० १०.८२.७)

तत्त्वचिन्तका 'नीहारेण प्रावृता' इव भवन्ति, असंतुष्टाश्च वर्तन्तेऽसुतृपाः। तं य इमा जनान तं न जानन्ति प्राप्नुवन्ति यतः 'अन्तरं बभूव।'

अतएव सत्तत्त्वशिवतत्त्वसाक्षात्कारो दुर्लभो भवति। सर्वेऽपि कवयः पुरोहिता अन्येऽपि तादृशाः सर्वेऽपि मननशीला भवन्ति। यास्कोपदेशं ब्रूयादेव निर्वचनं स्वीकृत्य ब्रवीमि निर्वचनं 'मनुते इति मनुजः' मानवो वा प्रयोजनमभिलक्ष्य। अतएव काव्यं, ब्रह्म 'विचारः वा' मन्म भवति वैदिककाव्ये। यज्ञं कुर्वत उषसं प्रेक्षतः सूर्यं पश्यतो देवमाराधयतः गिरिनितम्बे नदीसंगमे वा संचरतो निजकर्म कुर्वतो वा मानवस्य मनः संकल्पात्मकं भवति। स च संकल्पः शिव-

संयोगात्मकः । अतो मनसो महत्त्वं मननस्य च। मननादेव साक्षात्कारः। अतएव उक्तं—

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।

यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥

एषाऽऽसोत्तेषां प्रार्थना। एतदेव तेषां तत्त्वज्ञानम्। एष एवैकत्वस्य निगूढतत्त्वस्य विचारः साक्षात्कारश्च।

अथवा साक्षात्काराणां भवन्ति द्वाराणि सर्वत्र। केवलं तत्र संवेदनाक्षमं शिव-संकल्पात्मकं मनोऽपेक्ष्यते । तच्च वैदिककवीनां वसिष्ठविश्वमित्रवामदेवादीनामासीदत्र न संदेहलेशोऽपि विद्यते । तेषामासीत् सौंदर्यदर्शनं सूक्ष्मं यज्ञकर्मतत्त्वप्रधानं वैदुष्यं तत्त्वभेद्याचारः पवित्रः। न आचारहीनं पुनन्ति वेदा न वा तस्य संभवति परतत्त्वबोधः साक्षात्कारश्च। एवंप्रकारः साक्षात्कार आसीद् वैदिककवीनाम्। अतएव भगवता यास्केनोक्तं 'साक्षात्कृतधर्माणः ऋषयः।' परतत्त्वदर्शने हि विद्यते कवीनामृषित्वम्। ममाप्यत्रिगोत्रस्यायं भवत्यभिलाषः।

ऋतसत्यसत्पदादिभिर्द्योतितं कविकुलैर्यत्तत्त्वम्।

ननु भवेन् ममापि कदाचित्तदवभाससुखं क्षणमात्रम् ॥

अन्ते च

दिनत्रयं कृतं यच्च मया व्याख्यानचापलम्।

श्रुतं भवद्भिः क्षन्तव्यमित्येषा प्रार्थना मम ॥

इत्यधुना विरम्यते।

ां
त